:॥ श्रीरामः शरणम् ॥:

प्रबन्ध-रचयितुः

संक्षिप्तजीवनम्

(कस्माच्चित्तदात्मीयतः संगृहीतम्)

अस्ति खलु बङ्गेषु पूर्व्वसागराभिमुखप्रस्थितताया भगवत्या भागीरथ्याः पूतप्रवाहविधौतपश्चिमप्रान्तो भट्टपल्लीतिसुप्रसिद्धो जनपदः। स हि कालीकातानगरीत उत्तरस्यां दिशि योजनत्रयमात्रव्यवहितः। इतः प्रायो द्विशतवत्सरपूर्व्वं नारायणेतिसुगृहीतनामधेयः कश्चिद्वशिष्ठान्वयसम्भूतः सिद्धपुरुषः स्वकीयालौकिकसिद्धजनोचितकर्म्मपरम्परावलोकनोदितभक्तिविस्मयातिशयाकृष्टचित्ततया स्वयं स्वीकृतशिष्यभावेन हावलदारोपनामकेन तज्जनपदस्वामिना केनचिद्ब्राह्मणेन सानुनयमभ्यर्थितो यशोहरान्तर्गताया धूलियापुरेतिप्रसिद्धायाः स्ववासभूमेः सदारापत्यः समेत्य तत्र वसतिं कृतवानिति श्रूयते। नारायणः खलु बङ्गेषु राढ़ीयवारेन्द्रपाश्चात्यवैदिकादिबहुश्रेणीविभक्तेषु ब्राह्मणेषु पाश्चात्यवैदिकश्रेण्यन्तर्गतत्वेनात्मानमङ्गीकृतवान्; परं तदादिपुरुषः किमुत्कलदेशीय उत महाराष्ट्रदेशोद्भवः किंवा कान्यकुब्जीय इति तु विशेषतो न ज्ञायते। प्रचरन्ति पुनरुपर्य्युक्तदेशत्रयान्यतमप्रसूतत्वप्र [illegible] किंवदन्त्यः

अत्यल्पीयसैवानेहसाऽत्रागतस्य तस्य वंशो विस्तृतिं लेभे, येन जनपदोऽयं समन्तात् तद्वंशीयैरेवाधिकृतो बभूव। न केवलं वंशस्य तथाभूता विस्तृतिः, तद्वंशीयाश्च सदाचारवत्तया, समुज्ज्वलब्रह्मवर्चसेन, न्यायस्मृतिपुराणतन्त्राद्यशेषपारदर्शित्वेन, समधिकधर्म्मनिष्ठया, चान्यैरपि ब्राह्मणोचितसद्गुणैर्वङ्गेष्वचिरेणैव महतीं प्रतिष्ठां लब्धवन्तः। प्रायः सर्व्व एव सत्कुलजा बङ्गीयब्राह्मणाः परमाग्रहेण तान् दीक्षागुरुपदे प्रतिष्ठाप्य स्वयं शिष्यत्वमुपगम्य च कृतार्थम्मन्या बभूवुः। ततश्च गुरुतैव तेषां जीविका सञ्जाता। तेषां सदाचारवत्तायाः किमन्यद्बहु ब्रवीमि, यत्तेषु बहवः समयप्रभावाद् विपर्य्यस्तपूर्व्वभावा अपि पुनरिदानीमप्यशूद्रप्रतिग्राहिणो निरामिषभोजिनो धर्म्मानुरागिणश्च वर्तन्ते, कामयन्ते न च मनसाऽपि श्ववृत्तिम्। इत्थं विस्तृतिमुपगतस्य नानाशाखासम्पन्नस्य नारायणवंशस्य कस्याञ्चित् पण्डितपरम्परालंकृतायां शाखायां प्रबन्धप्रणेतुरस्य जन्माभवत्। न केवलमस्य पितृकुलं मातामहकुलमपि सुप्रसिद्धगौतमगोत्र-"जाम्रम्"भट्टवंशीयानामन्यतमविद्वत्परम्परालंकृतञ्च। जन्मसमयश्चास्य शकाब्दाः १७७२, वङ्गाब्दाः १२५७ गौणज्यैष्ठस्य मुख्यवैशाखस्य वा कृष्णादशमी तिथिः। तदानीन्तस्य पितृकुलं, मातृकुलञ्च सम्यगक्षुण्णमासीत्। तथाहि जन्मसमये पितृकुले पितामहचरणा मातापितृचरणावकृतदारपितृव्यचरणश्च वर्तमाना आसन्। पितृव्यचरणस्य परिणयस्तस्य शैशवावस्थायामेव बभूव। पितामहचरणास्त्वस्य नवीने वयसि दारकद्वयमात्रं प्रसूय परलोकप्रस्थितायां स्वपत्न्यां पुनर्दारपरिग्रहपराङ्मुखाः स्वयं माता च पिता च भूत्वा शिशुपुत्रद्वयं सर्वप्रयत्नैः संवर्द्धयामासुः। निजविमातरञ्च समुचित-

भक्तिश्रद्धाभ्यां सम्पूज्य स्वगृहस्य सर्वाध्यक्षकर्म्मणि स्थापितवन्तः। मातृकुले च सदारा मातामहपादाः सपत्नीका मातुलाश्च त्रय आसन्। उभयत्र तु स एवैकमात्रं बालापत्यं जातः। ततश्चोभयपक्षीयाणां निरतिशयस्नेहभाजनमासीत्। अथ समतीते पञ्चमे वर्षेऽस्य यथाविधिविद्यारम्भः सञ्जातः। वर्षेणैकेनैव वङ्गाक्षराणां लेखने पठने चास्य नैपुण्यं सञ्जातम्, ततोऽसौ "सुपद्माख्यं" पद्मनाभविरचितं संस्कृतव्याकरणं पठितुमारब्धवान्। त्रयोदशवर्षे वयसि तेन व्याकरणशास्त्रे समीचीनव्युत्पत्तिर्लब्धा, संस्कृतवाक्यरचनाशक्तिश्च प्रदर्शिता, विरचितानि चानुष्टुभा छन्दसा बहूनि सुगमगीर्व्वाणगिरा पद्यानि, व्याकरणमधीत्यैव तस्य हितोपदेशप्रमुखाणां बालपाठ्यसंस्कृतनिबन्धानां विनैव गुरूपदेशमर्थावबोधे शक्तिः सञ्जाता। अत्रावसर एव तत्पितामहचरणैस्तस्य तथाविधां शक्तिमवलोक्यानन्दपरम्परामनुभवद्भिः कयापि सर्वतोऽनुरूपया सत्कुलजया कन्यया सहास्य पाणिग्रहणकर्म महोत्सवोत्तरं सम्पादितम्। पितामहचरणास्तस्य शिरोमण्युपाधिकानन्दचन्द्रनामानो वाग्मिनः सुकवयः सर्व्वशास्त्ररहस्यविदो वङ्गेषु, तदानीं लब्धप्रतिष्ठेषु विद्वत्स्वन्यतमा आसन्। न केवलमेते सुधीजनसहचराणां सर्व्वसद्गुणानामाश्रयभूता वपुरप्येषामखिलमहापुरुषलक्षणाङ्कितमाभ्यन्तरतेजोगाम्भीर्याभिव्यञ्जकमनन्यसाधारणं सकृद्दर्शनमात्रत एव दर्शकहृदयाकर्षकमासीत्। अथ प्रकृतमनुस्त्रियते—ततो वर्षचतुष्टयं यावत् काव्यालङ्कारछन्दोग्रन्थानामनुशीलनं कृतमनेन। अथ सप्तदशवर्षे वयसि नव्यन्यायमध्येतुं प्रवृत्तोऽभवदसौ। प्रथमं वर्षमेकं महामहोपाध्यायश्रीयुतराखालदासन्यायरत्नसकाशादधीत्य निजपितृव्यपादानां तर्करत्नोपाधिकयादवचन्द्र-

शर्म्मणां शिष्यत्वं प्रतिपेदे। न्यायशास्त्राध्ययनसमय एवान्तरान्तरा वङ्गेषु लब्धप्रतिष्ठस्मृतिशास्त्राध्यापकश्रेणीमारूढ़ानां स्मृतिरत्नोपाधिक-मधुसूदनशर्म्मणां स्वपितृचरणानां चरणमूलमुपेत्यायं नव्यस्मृतिनिबन्धानामपि पाठनं शुश्राव। इत्थं समतीतानि त्रिचतुराणि वर्षाणि।

अथादृष्टस्य प्राबल्याद्वावश्यम्भाविभावानामवश्यभव्यतया वा नियतिनिर्देशस्यालङ्घ्यतया वा तस्मिन्नवसरे तस्याङ्गलभाषाशिक्षायां गरीयसी प्रवृत्तिः सञ्जाता। तदानीं तद्वंशीयाः सर्व्वं एव तद्भाषाशिक्षाया न केवलं प्रतिकूला आसन्, अपि तु तच्छिक्षणं हि षष्ठमिव महापातकं विशेषपातित्यकारणं मन्यन्ते स्म, येन तत्स्वजनास्तदिच्छोपरोधमनुचितं मन्यमाना अपि तस्य तत्कर्म्मद्वारा पातित्यस्पर्शशङ्कयेव प्रबललोकवादभिया च न तं तत्कर्म्मानुष्ठातुमनुमेनिरे, प्रत्युत बहुविधसान्त्वनवचोभिस्तं तथाविधोद्यमात् तत्कालं निवर्तयामासुः। किन्तु—

"क ईप्सितार्थस्थिरनिश्चयं मनः, पयश्च निम्नाभिमुखं प्रतीपयेत्।"

गुरुजनाज्ञया कियत्कालं तादृशीं बलवतीमिच्छामवरुद्ध्य पूर्व्ववदनन्यमनसा संस्कृताध्ययने वर्त्तमानोऽप्यसौ न तामेकान्ततः परिहातुं शशाक; अल्पीयसैव समयेन तथानिरुद्धप्रसरा सेच्छा वाष्पसन्ततिरिव पुनः पूर्व्वावस्थातः प्राबल्यमाप; अनन्योपायश्च हुगलीकालेजाख्यविद्यालये ह्यधीयानं स्वग्रामे निवसन्तं जयगोपालवन्द्योपाध्यायनामानं कमपि तीक्ष्णधियं छात्रमनुनीय तस्मै तत्पाठ्यसंस्कृतपुस्तकाध्यापनमङ्गीकृत्य च तत्सकाशात् "अथवा विद्यया विद्या" इतिप्राचीनन्यायमनुसृत्यातिगोपनेनाङ्गलभाषामध्येतुं प्रवृत्तोभवत्। वर्षत्रयं तथैवाधीत्य प्रवेशिका (Entrance) परीक्षोपयोगि-

पुस्तकानामनायासार्थबोधशक्तिस्तथाङ्गलभाषायामावश्यकवा-क्यरचनानैपुण्यञ्चास्याभवत्, तथा ह्यपरे विद्यार्थिनो विद्यालयेषु यथाविध्यध्ययनतो द्वादशवत्सरैर्यत्फलं लभन्ते, वर्षत्रयमात्रमनियताध्ययनेन तेन तत्फलं लब्धम्। अथ क्रमेण तदपि रहस्यं सामाजिकेषु प्रकाशमियाय, येनास्य ग्रामे सुमहदपयशः कलङ्कश्च महान् सञ्जातः। तदाकर्णनेन स्वजनाः खल्वस्य मनसि नितरां व्यथां प्रपेदिरे, तिरस्कर्त्तुमारेभिरे च तं सर्व्वदा रहसि। इत्थं भग्नोद्यमोऽसौ संस्कृताध्ययनेऽपि पराङ्मुखः किंकर्त्तव्यविमूढः स्थितः। यावदसौ जयगोपालवन्द्योपाध्यायोऽपि बि० ए० परीक्षायां विफलमनोरथो लज्जया स्वजनमुखदर्शनमपि तापहेतुं मन्यमानो वङ्गदेशं विहाय सुदूरपञ्चनदाभिमुखं प्रतस्थे। ततश्च वर्षद्वयं तस्य दिवसानि दुःखदुःखेनैवातीतान्यभवन्। एकत आङ्गलभाषाशिक्षाया व्याघातेन महान्मनस्तापोऽन्यतश्च संस्कृतशिक्षादरशैथिल्येन स्वजनकृतगुरुतिरस्करणजनितसन्तापः। इत्थं द्वौ सन्तापौ मिलित्वा मनसोऽस्य महान्तं विक्षेपं जनयामासतुः। नाहाराभिरुचिर्न निद्रा नापि समानवयोबन्धुजनसम्भाषणप्रीतिरभवत्। एतस्यामवस्थायां गृहावस्थितिरसह्यदुःखप्रदैवाभवद्। तेन सोऽपि द्विसप्तत्युत्तराष्टादशखृष्टाब्दस्य (१८७२ ई०) प्रारम्भे गुरुजनाननामन्त्र्यैव केनापि बालमित्रेण सह निभृतं पञ्चनददेशाभिमुखमेव प्रस्थितः। तदानीं जयगोपालवन्द्योपाध्यायः पञ्चनदान्तर्गत-"गुजरान्वाला"नामधेये जनपदे कस्मिंश्चित् मिशनरि-विद्यालये द्वितीयशिक्षकपदमधिष्ठित आसीत्। स तत्रैव तत्समीपे जगाम। बहुदिवसानन्तरं परस्परसम्मिलनसुखमनुभवन्तौ तावुभावेव परमानन्दसन्दोहाप्लुतचित्तावभूताम्। मासमेकं वन्द्योपाध्यायः सादरं तं स्वसमीपे संरक्ष्य तदानीन्तन-

पञ्चनदमहाविद्यालयाशेषकार्य्यसम्पादकसभयाचिरग्राह्यतयोद्-घोषितासु परीक्षासु "प्राज्ञे"तिनामधेयामादिमसंस्कृतपरीक्षां प्रदातुमेनं लवपुरे ("लाहोर"-नगरे) परीक्षाया दिवसत्रयपूर्वं स्वव्ययेनैव प्रेरयामास।

अथायं लवपुरं समेत्यैव तदानीन्तनपञ्चनदमहाविद्यालयकार्य्य-सम्पादनसमितेः प्रधानसदस्याभ्यां श्रीयुक्तबाबूनवीनचन्द्रराय-चीफ़पण्डितश्रीयुक्तराधाकृष्णगोस्वामिभ्यां मिलितः ताभ्यां सम्यक् परीक्षितश्च। तौ च तं परीक्ष्य युगपदुक्तवन्तौ—"का नाम प्राज्ञपरीक्षा, तुच्छैव सा श्रीमतो विद्यावत्तायाः। नास्मिन् वर्षे "शास्त्रि" परीक्षाया आयोजनमस्ति, ततश्च वर्षेऽस्मिन् संस्कृतोच्चपरीक्षार्थिदातव्यतया निर्द्धारितां विशारदा-ख्यपरीक्षां ददातु भवान्, भाविनि वर्षे "शास्त्रि" परीक्षां दास्यतीति। तेन सविनयमुक्तम्,—"न मया विशारदपरीक्षा-नियमावली विदितभूयिष्ठा, नापि तत्पाठ्यानि संस्कृतपुस्तकानि सन्ति मत्समीपे, दिनञ्चैकमात्रमन्तरालवर्ति वर्त्तते, किञ्च तत्र दातव्यं शुल्कं न वर्त्तते मत्पार्श्वे, तत् कथं तत्परीक्षां दातु-मुत्साहं कुर्य्याम्"। एतदाकर्ण्य तौ सस्मितमुक्तवन्तौ"न कापि चिन्ता कार्य्या, पुस्तकान्यस्मत्तो गृहाण, अन्यत् सर्व्वमावां पूरयिष्यावः। भवता केवलं परीक्षादिवसे यथाकालं परीक्षा-गृहे समुपस्थातव्यमिति" एवमुक्तोऽसौ प्रहृष्टात्मा ताभ्यां प्रदत्तानि पुस्तकान्यादाय स्ववासस्थानमाजगाम। आगत्य च त्यक्तनिद्र एकाग्रमनसा पाठ्यपुस्तकान्यवलोकयन्नेव तां निशामनैषीत्। परेद्युः केवलं प्रथमदिनपरीक्षणीयपुस्तकानि पपाठ तत्परेद्युश्च परीक्षारम्भः समभवत्। प्रथमदिवसीय-प्रश्नानामुत्तराणि लिखित्वा मेलयित्वा चापरपरीक्षार्थि-प्रदत्तैरुत्तरैः सह समुदिताऽस्य हृदये बलवत्याशा। इत्थमुत्तरो-

त्तरसंवर्धितया चाशया दिवसत्रयं लेखनपरीक्षां दत्वा चतुर्थदिवसे च मौखिकपरीक्षायामुच्चसङ्ख्यां लब्ध्वा सञ्जातस्तस्य मनसि परीक्षासाफल्ये बलवानाश्वासः। एवं समाप्तिमुपगते परीक्षाकर्म्मणि, तस्य संस्कृतरचनानैपुण्यं कवित्वशक्तिमपि परीक्ष्योपन्यस्तं विद्वत्प्रवराभ्यां ताभ्यां—"सुचिरमुपकल्पितमस्माभिः संस्कृतभाषायां मासिकपत्रस्यैकस्य प्रकाशनं,परं तत्सम्पादनक्षमपुरुषाभावेन नाद्यापि कार्य्यारम्भः कृतः। साम्प्रतं श्रीमन्तं योग्यपुरुषमुपलभ्याविलम्बेनैव तत्प्रकाशनेच्छा कृता तद्भवानिहैव स्थित्वा पत्रिकाया अस्याः सम्पादनं करोतु। तदर्थं प्रतिमासं पञ्चविंशतिमुद्राः प्राप्स्यति"—इति। तेनापि सविनयं कृतज्ञतां प्रकाश्याङ्गीकृतस्तत्प्रस्तावः। तदवध्येव "विद्योदय" स्याविर्भावः।

अथातीते मासैकमिते समये परीक्षायाः सुफलमपि विज्ञातमभूत्। परीक्षोत्तीर्णताहेतोः प्रतिमासं द्वादशमुद्रावृत्तिश्चास्य परिकल्पिताऽभवत्। नासौ "गुजरान्वाला"—प्रदेशे पुनः प्रत्याजगाम। लवपुरे निवसन्नेव वर्षमेकं निरन्तरपरिश्रमेण शास्त्रिपरीक्षापाठ्यपुस्तकान्यधीतवान्। सममेवाङ्गलभाषाप्रवेशिकापरीक्षापाठ्यपुस्तकानामपि पाठं चकार। अथ वर्षान्ते परीक्षाद्वयी प्रदत्तानेन, (१) शास्त्रिपरीक्षा, (२) आङ्गलभाषायाः प्रवेशिकापरीक्षा च। तत्र "शास्त्रि" परीक्षायामेक एवासौ समुत्तीर्णो बभूव, प्रवेशिकापरीक्षायाञ्च प्रथमश्रेण्यामुत्तीर्णो बभूव। अयं हि वाल्मीकिरिव कवीनां, ओंकार इव छन्दसां राजकीयशास्त्र्युपाधिभूषितानां तथा वृटिशराजप्रतिष्ठितापरसंस्कृतोपाधिमतामाद्यो यतो हि १७७३ खृष्टाब्दे, शास्त्र्युपाधिपरीक्षा पञ्चनदेषु प्रथममेव प्रवर्त्तिता बभव, असावेव तत्र

सकलपरीक्षार्थिनामादिम आसीत्, १९१३ खृष्टाब्दीयपञ्चनद-विश्वविद्यालयस्य कालेण्डराख्यविवरणीपुस्तकमत्र प्रमाणम् । कलिकातासंस्कृतविद्यालयस्य समुत्कृष्टछात्राय शास्त्र्युपाधि-वितरणप्रस्तावो हि पञ्चनदविश्वविद्यालयस्यानुकार्य्येव वङ्गेषु संस्कृतोपाधिपरीक्षाकल्पश्च सुभृशमर्व्वाचीनः, एवं स्थिते कोनामास्य भारतेष्वाधुनिकविद्वद्वृन्दानामग्रणीत्वं प्रति-भायाश्चास्य निरङ्कुशत्वं नाङ्गीकुर्य्यात्? भवतु। शास्त्रिपरीक्षो-त्तीर्णताहेतोः पुरस्कृतिं मुद्राशतं तथा प्रतिमासं त्रयस्त्रिंशन्मुद्रा-वृत्तिश्चास्य कल्पिताऽभवत् ततो वर्षद्वयम् इन्टारमिडियेट् (Intermediate) परीक्षापाठ्यपुस्तकानि यथाविधि पपाठ। किन्तु दैवनिर्बन्धान्न तत्र परीक्षायां साफल्यं लेभे। एतावतैवास्य छात्रा-वस्था विरतिमाप। ततः परं लवपुरस्थे"ओरियेन्टेलकालेजाख्य-(Oriental college) राजकीयविद्यालयेऽन्यतमसंस्कृताध्यापक-पदं प्राप्य दशवर्षाणि यावत् तत्र स्वनियोगमनुतिष्ठन् परां प्रतिष्ठां लेभे। एतावान् समयस्तेन परमानन्देनातिवाहितः। स्वगृहे पितृ-पितामहमातृभ्रातृप्रमुखप्रियपरिजनानां सद्भावात्तत्र निरन्तरं सुखमासीत्, कर्मस्थाने च स्वोपरितनविद्यालयाध्यक्षपुरुषा-णामसीमानुग्रहलाभेन छात्रेषु च सदध्यापकतानिमित्तकप्रतिष्ठा-लाभेन प्रतिवर्षं समीप्सितवेतनवर्द्धननिमित्तेन च निर्बाधं सुखमनुबभूव।

अवसरेऽस्मिन्नेतदपि वक्तव्यपक्षे प्रतिभाति, प्रथमं तस्याङ्गल-भाषाशिक्षाप्रावण्यमवलोक्य प्रायः सर्व्वे एव स्वग्रामीणा महत्तराः क्षुद्रतरा अपि तं विविधव्यङ्ग्योक्तिपरम्पराभिरुपह-सितवन्तो निनिन्दुश्चायथा दोषानारोप्य तदुपरीति पूर्व्वमुक्तम्। तेन तु तदानीन्तान् प्रति न किमपि प्रातिकूल्यमाचरितम्, सोढाश्च तेषां तथाविधाः कटुव्यवहारास्तूष्णीम्। परं मनसि प्रतिज्ञातं

'यदि कदाचित् प्रयत्नस्यास्य मे साफल्यं भवेत्, तदा यथैतेऽका-रणमदिच्छाव्याघातका मूढाः स्वयं प्रवृत्ता एव स्वपुत्रादीनाङ्गल-भाषां शिक्षयेरंस्तथैव प्रयत्नः कार्य्यो मया'। अथ प्रतिज्ञैष तस्य समयेनैव सम्पूरिता। नामुष्य प्रयत्नोऽपेक्षितः। लवपुरे तस्य क्रमशः परिवर्द्धमानामुन्नतिमाकर्ण्याकर्ण्य ते हि प्रतिपक्षा ईर्ष्यया मात्सर्य्येण कारणान्तरेण वा परिवर्त्तितमनोभावा एकैकशः स्वपुत्रादीनाङ्गलविद्यां शिक्षयितुं प्रवृत्ता बभूवुः। येनेदानीं भट्टपल्लयामाङ्गलविद्याविदुषामेव सर्व्वथा प्राबल्यं सञ्जातम्। परं—

"चक्रवत्परिवर्त्तन्ते दुःखानि च सुखानि च" अत्रावसरे तस्या-दृष्टचक्रस्य विपरीतभागः समुत्थितो बभूव। प्रथमं स्नेहमयी जननी तस्य सहसा सान्निपातिकज्वरेणाक्रान्ता दिवसत्रयाभ्यन्तर एव परलोकमियाय। तदानीं स लवपुरे स्थितः। वैद्युतिक-वार्त्तावहयन्त्रद्वारा प्रेरितं वृत्तमिदं विज्ञाय स्वगृहं प्रति चलितः। आगत्य च निरन्तरसुखहास्यपूर्णं गृहं विषमशोकच्छायामलिनं हाहारवमुखरीकृतं विलोक्य हृदयमस्य विदीर्णमभवत्, मूर्च्छि-तश्च क्षितितले निपपात। अथ तत्पितामहचरणाः, पितृचरणाः, कनीयान् भ्राता चान्ये च स्वजनाः सर्व्वे स्वयं शोकविह्वलचित्ता अपि ससम्भ्रमं समेत्य तथाविधं तं जलसेकादिशीतलोपचारेण लब्धसंज्ञं कृत्वा विविधप्रबोधवचनैः सान्त्वयित्वा च कथमपि सुस्थं चक्रुः। अथ यथाविधि स्वर्गगताया जनन्याः श्राद्धादिकृत्यं सम्पाद्य मासद्वयं स्वगृह उषित्वा पुनः स्वजनैर्लवपुरे प्रेरितोऽसौ भग्नहृदयो दुःखदुःखेनैव स्वकार्य्यमनुष्ठातुमारेभे। ततो मासचतु-ष्टयान्ते सहधर्म्मिणी चास्य शैशवावस्थास्थितं कन्याद्वयं स्वज-नाँश्च परित्यज्य परलोके प्रस्थिता बन्धुवर्गाणां पूर्व्वोत्पन्नं शोकोच्छ्वासं द्विगुणं वर्द्धयामास। एतद्वृत्तमपि तस्मै यथाकालं

स्वजनैः प्रेरितम्, किन्त्वसौ गृहमनागत्यैव तत्रत्यैर्बन्धुवर्गैः सम-महर्निशं शोकोपशमोपायभूतानि बहुविधानि क्रीड़ाकौतुकानि कुर्व्वन्नगाधं शोकसागरमुत्तर्त्तुमियेष। कालेन लघूभूतश्च प्रथम-मतिदुःसहत्वेन प्रतीयमानः स शोकावेगः। सार्द्धैकवर्षान्ते गृहमा-गत्य पितृपितामहचरणैः सनिर्बन्धमाज्ञप्तः पुनर्दारपरिग्रहं चकार। सा इदानीं तद्गृहस्वामिनी संवृत्ता। तस्यामसौ षट्पुत्रान् कन्याञ्चैकामुत्पादयामास। पुत्रेषु चत्वार एव साम्प्रतं वर्त्तन्ते। तेषु ज्येष्ठः श्रीभवभूतिनामधेय आङ्गलभाषायां गीर्व्वाणवाण्या-मपि सुशिक्षितः साम्प्रतं कलिकाता-संस्कृतकलेजाख्यविद्यालये संस्कृतमध्यापयति। द्वितीयः श्रीभवविभूतिनामा संस्कृतभाषायां एम० ए०। तृतीयः श्रीअनुभूतिनामकः हुग्लीकलेजाख्यविद्यालये प्रथमश्रेण्यां पठति। चतुर्थस्तु श्रीध्रुवज्योतिर्नामाष्टवर्षदेशीयो-ग्राम्यपाठशालायां प्राथमिकशिक्षां लभते। सर्व्व एवैते विनयार्ज्ज-वादिगुणालंकृताः सुशीलाश्च वर्त्तन्ते।

अथ द्वितीयदारान् परिणीय स पुनरेव लवपुरं प्रत्या-गतः पूर्व्वतः सुस्थतरहृदयेन स्वकार्य्यङ्कर्त्तुमारेभे। अहो दुर्दैव-विपाकः!

"एकस्य दुःखस्य न यावदन्तं, गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे, छिद्रेष्वनर्था बहुलीभवन्ति॥"

इत्येष श्लोकस्तस्मिन्नक्षरशो यथार्थो बभूव। यतो वर्षान्ते पुनरेकमात्रस्य प्राणेभ्योऽपि प्रियतमस्य भ्रातुः परलोकप्रस्थानवार्त्ता तदन्तिकमुपगता तं पूर्व्वतोऽप्यधिकतरं शोकविधुरं कृतवती। इत्थमुपर्य्युपरि दुःसहशोकशल्योपहतं तदीयहृदयं नितरां भग्नम-भवत्। स सर्वथा निरुत्साहः स्वजीवितेऽपि सम्यक् श्लथादरो बन्धुभिर्मधुरवचनैरहर्निशं प्रबोध्यमानः कथं कथमपि निज-कर्त्तव्यकर्म्माणि निर्व्वाहयामास। समागते तु ग्रीष्मकालीना-

नध्यायावसरे नितान्तभग्नहृदयः स्वगृहमाजगाम । अहो ! यदितः पूर्व्वं नन्दनकाननमिव सर्व्वतः सुखकरमासीत्, तदद्य श्मशानमिव महादुःखप्रदं हाहारवपूर्णमवलोकयामास स्वगृहम् । अशीतिपराणां वर्षीयसां पितामहचरणानां तथा वार्द्धक्यमुपेयुषां पितृपादानाञ्च दुःसहशोकोच्छ्वासविधुरां शोचनीयामवस्थामवलोक्यायं सुदुःसहमपि स्वशोकं कथञ्चिल्लघूकृत्य तान् परिसान्त्वयितुमारेभे । क्रमेणैतान् कथञ्चित् प्रकृतिस्थान् विधाय पुनर्लवपुरमागतः पूर्व्ववत् स्वकार्य्यमनुतस्थौ । लवपुरे पुनरागमनात् परं वर्षमेकमतीतम् । तदुपरि दुर्ग्रहकोपस्य तथापि न शान्तिरभवत्, प्रत्युत पूर्व्वतोभृशं वव्रधेऽसौ । ये खल्वेतावत्कालपर्य्यन्तं वर्षीयांसोऽपि दुःसहशोकावेगविधुरा अपि षोडशवर्षीययुवान इव शोकविधुराणां शेषपरिजनानां प्रधानावलम्बनभूता आसन्, येषां महार्घोपदेशवचनपरम्परया निगृहीतोपर्य्युपरिसङ्कटमानसुदारुणशोकावेगाः परिजनवर्गाःस्वस्वकर्मनिरता आसन्, ते परमविद्वांसो ज्ञानवतामग्रेसराः पितामहपादा अस्य द्व्यशीतितमवर्षे वयसि नश्वरमानवदेहं विहाय निर्व्वाणमगमन् । अथ तथा प्रधानावलम्बनभूतानामेकान्तपुत्रवत्सलानां पितृदेवानामन्तर्धानेन प्रथमत एव निरन्तरातिविषमशोकाघातभग्नहृदया वीतधैर्य्याः पितृपादा अस्य अनाथा इव असहाया इव अवसन्नहृदया निश्चेष्टा निरुत्साहा दुःखदुःखेन समयमतिवाहयितुमारेभिरे । एतस्मिन्नवसरेऽप्यसौ लवपुरे स्थितो वार्त्तामेतामधिगत्य नितरां शोकाकुलोबभूव । तत्र स्थितश्च मनसि स्वपितृचरणानां तथाविधं शोचनीयदशाभिभवं संस्मरन् निरतिशयक्लेशमनुबभूव, अथ तथाभूतान् तान् विहाय तादृशातिदूरदेशेऽवस्थानमात्मनो भविष्यदुन्नतिपरम्पराकारणमपि नास्मै रोचतेस्म । ततःस्वगृहमागत्य प्रथमं पितृचरणान् स्वकर्मस्थाने

नेतुकामस्तान् सनिर्बन्धमनुरुरोध। न तु तेभ्यः प्रस्तावोऽयं रुरुचे। अत्रावसरे कलिकाताराजकीयसंस्कृतपाठशालायां संस्कृताध्यापकपदमेकं शून्यमभवत्। तदानीन्तनतद्विद्यालयाध्यक्षेण महामहोपाध्यायेन महेशचन्द्रन्यायरत्नेन समस्य पूर्व्वत एव प्रगाढः परिचयः स्थितः। सोऽपि तस्मिन्विशेषतः स्नेहवानासीत्। तेन चास्य समीपे तत्पदग्रहणं प्रस्तुतम्। सोऽपि तथाभूतपदग्रहणं स्वोन्नतिप्रतिबन्धकीभूतं जानन्नपि तदानीन्तनावस्थोचितं मन्यमानो बन्धुवर्गैर्भूयोभूयो निषिध्यमानोऽपि प्रबोध्यमानोऽपि स्वोन्नतेः पितृशुश्रूषां श्रेयसीं विचिन्वानः पदमेतदङ्गीचकार। एतावानेवास्योन्नतिसमयः। अथाधःपतनसमयसमारम्भः।

अलमेतदाख्यानद्वारा पाठकानामस्योपर्य्यनादरोत्पादनेन। स्वदेशागमनाद् द्वादशवर्षान्ते पितृचरणा अस्य स्वर्लोकमारूढाः! ततो विपुलसंसारभार एकाकिनस्तस्योपरि पतितः। किन्तु स स्वभावसिद्धासीमसहिष्णुतया सुदक्षकर्णधार इव बहुविघ्नादिपरिवृतं संसारार्णवं सुखमतरत्। अविचलितधर्म्मबुद्ध्या कर्त्तव्यमार्गात् कदापि न भ्रष्टः, सुदृढशास्त्रप्रत्ययेन प्रभूतार्थलालसामप्यगणयित्वा अशास्त्रीयविषयेषु पदं न चकार। कालक्रमेण वृद्धत्वमापन्नः चिरराजसेवालब्धां पेन्शनाख्यवृत्तिं लब्ध्वा वर्षचतुष्टयमात्रं तामुपाभुङ्क्त। तदार्थस्याल्पत्वेऽपि स्वकीयकर्त्तव्यपथात् लेशमात्रमपि न स्खलितः, चिरलालितस्य विद्योदयाख्यस्य संस्कृतमासिकपत्रस्य प्रकाशनञ्चावरोद्धुं न शशाक। प्रकाशतेऽसौ "विद्योदयः" पूर्ववदिदानीमपि भट्टपल्लीतो यस्य प्राक्तनसंख्यातः प्रबन्धा एते संगृह्य प्रकाश्यन्ते।

पण्डितहृषीकेशशास्त्रिणश्चरितप्रसङ्गे तदानीन्तनप्राच्यप्रतीच्यविद्यालयाध्यक्षस्य 'पञ्जाब'-विश्वविद्यालय—रेजिस्ट्रार-

पदमलङ्कुर्वतः डाक्टर जि० डब्ल्यू "लिटनर" महोदयस्य विद्वज्जनादराश्रितवत्सलत्वगुणग्राहित्वादिधर्म्माणामनुल्लेखेन न केवलं चरितमिदमसम्पूर्णं तिष्ठेदपि त्ववश्यकर्त्तव्याऽपालनजनितो महानधर्म्मोऽपि भवेदिति विविच्य चात्र महात्मनस्तस्यापि किञ्चित्कथ्यते। सहि महात्मा न केवलमाङ्गलभाषाभिज्ञानामग्रणीरासीत्, परं ग्रीक्-लैटिन-फ्रेंच-प्रमुखासु प्रतीच्यभाषासु विशेषाभिज्ञतासम्पन्नस्तथाऽऽरव्य-पारसीक-पश्तो-उर्दू-हिन्दी-प्रमुखासु भाषास्वपि तत्तद्देशजात इव सम्यग्व्युत्पत्तिं लेभे। स भारतवासिनां सर्व्वविधसमुन्नतिकामः प्रकृतबन्धुरभवत्। तस्यैव महात्मनोऽविश्रान्तप्रयत्नेन समुचिताभिश्चेष्टाभिश्च "पञ्जाब"—विश्वविद्यालयस्य प्रथममाविर्भावः सञ्जातः। 'पञ्जाब' विश्वविद्यालय-सूत्रपातादनन्तरमेवासौ कस्मिँश्चिद्रहस्यभूते कर्मणि दौत्यकर्मकरणाय सर्व्वप्रधानराजपुरुषेण भारतभूमेः पाश्चात्यसीमान्तेषु प्रहितोऽभवत्। ततश्च शास्त्रिणः प्रथमलवपुरगमनावसरे नासौ महात्मा तत्र स्थितः। 'पियरसन'—नामधेयकः कश्चिदपरः श्वेताङ्गस्तदानीं तत्कर्म्माण्यनुतिष्ठतिस्म। विद्वत्कुलधुरन्धरोऽसावपि प्रथमक्षणादेव शास्त्रिणि विशेषतः प्रीतिमान् सानुग्रहदृष्टिश्चाभवत्, चकार च शास्त्रिणं प्राच्यविद्यालयसंस्कृताध्यापकपदे स्थापयितुं महान्तं प्रयत्नम्, तदीयानुग्रहेणैवास्य तत्पदलाभे कृतकृत्यता सञ्जाता। अथ डाक्टरलिटनरमहोदयो यदा तदागन्तुककर्माणि साधयित्वा लवपुरं प्रत्यावृत्य स्वपदं पुनरधिचकार, तदा पण्डितोऽसौ प्राच्यविद्यालयसंस्कृताध्यापकपदे स्थितः। डाक्टरलिटनर-महोदयस्य तु स्थितेऽपि भारतवासिनामुपरि निरतिशयप्रेमणि पाश्चात्यशिक्षाविकृतमस्तिष्केषु वङ्गदेशीयेषु काप्यप्रीतिः स्वभावत एव स्थिता। ततश्चासौ निजाधिकारान्तर्गते विद्यालये

वङ्गदेशीयं तमध्यापयन्तमवलोक्य तदुपरि दर्शनक्षण एव साव-ज्ञदृष्टिं निक्षिप्य तेन सहानादरव्यवहारं कृतवान् । किन्तु तथाविधानादरभावो न चिरस्थायी बभूव। स्वल्पीयसैव काले-नेतरपण्डितासुलभानां तदीयासाधारणगुणगणानां परिचयं प्राप्य न केवलं तिरोहितस्तस्य तदुपरि सावज्ञभावः, प्रत्युत परस्परमसमं बन्धुत्वं प्रादुर्भूतम् । ततः प्रभृति निरन्तरमेव पण्डि-तस्यास्य समुन्नतये स्वयं चेष्टतेस्मासावपि। सर्व्वेष्वेव स्वक-र्मसु तमन्तरङ्गं कृतवान् । तेन सहामन्त्रणमन्तरेणासौ विद्या-लयसम्बन्धि किमपि कर्म्म न चकार । शास्त्रिणो लवपुरसम्ब-न्धत्यागान्मासषट्कपूर्व्वं निरन्तराविश्रान्तपरिश्रमेण डाकृरमहो-दयस्य स्वास्थ्यभङ्गः संवृत्तः । येनासौ वर्षद्वयं यावत् स्वकर्मतो विश्रामं लब्ध्वाङ्गलभूमौ गतवान् । स चेत्तदानीं लवपुरेऽस्थास्यत् तदा शास्त्रिणं कथमपि स्वदेशमागन्तुं नान्वमंस्यत। यतोऽसौ स्वदेशयात्रायाः प्राक्राजकीयप्रतीच्यविद्यालये तदानीं वर्त्तमा-नस्य संस्कृताध्यापकस्य पेन्शनाख्यवृत्तिप्राप्तिसमयमदूरभाविन-मवलोक्य तत्पदे शास्त्रिणं स्थापयितुं तदानीन्तनप्रधानराज-पुरुषान् सनिर्बन्धमनुरुध्य स्वदेशं गतवान् । तैश्च तत्तथै-वाङ्गीकृतम् । किन्तु—

"प्रतिकूलतामुपगते हि विधौ, विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि ॥"

विदितैतत्सर्ववृत्तान्तोऽपि दुर्ग्रहकुटिलकटाक्षविषयीभूतः शास्त्री त्वरितत्वरितं स्वदेशमागत्य तदर्थं दुर्ग्रहैः प्रस्तुतं पदं जग्राह। नात्मप्रतिष्ठां,न भविष्यदुन्नतिपथानर्गलतां,न डाकृरमहो-दयस्य तदुपरि निरतिशयस्नेहान्, नापि पञ्चनदे निजप्रतिष्ठा-मुख्यसहायभूतस्य रायश्रीनवीनचन्द्रस्य सनिर्बन्धमनुरोधं चिन्त-यामास, तानि सर्व्वाण्यविगणय्यैकपद एवासौ स्वदेशमागतः ।

अथ वर्षद्वयान्ते लिटनरमहोदयः शास्त्रिणमनवलोक्य निरतिशयं चित्तक्षोभमवाप। स स्वयमविलम्ब्य कस्यचिदावश्यककर्मणो व्यपदेशेन तं प्रत्यावर्त्तयितुं कलिकातानगरे समेतः। तस्मै प्रस्तुतराजकीयप्रतीच्यविद्यालयसंस्कृताध्यापकपदेन समं 'पञ्जाब'—विश्वविद्यालयसहकारिरजिस्ट्रारपदमपि दातुमङ्गीचकार। शास्त्री च स्वजनहस्तेषु वृद्धानामसहायानां शोकविधुराणाञ्च पितृचरणानां रक्षणावेक्षणभारं सानुनयं विन्यस्य पञ्चनदाभिमुखं पुनश्चलितः। किन्तु मासाधिककालं तत्र स्थातुं न शशाक, विरुद्धग्रहा हि तदुन्नतिप्रतिबन्धस्य नोपायान्तरमवेक्षमाणास्तस्य शरीरे दारुणजीर्णज्वररोगस्य सञ्चारं कृतवन्तः। येनासौ प्रत्यहं प्रतिक्षणं परिक्षीणशरीरधातुरात्मनो मृत्युं प्रतीक्षमाणस्तस्थौ। लिटनरमहोदयस्तु तस्य तादृशीं शरीरावस्थां विलोक्य तमधन्यानामग्रेसरं स्पष्टभाषया निर्दिश्य तस्मै गमनागमनव्ययव्यपदेशेन द्विशतीं मुद्राः प्रदाय स्वयमेव स्वदेशं प्रस्थापितवान्, किन्तु न तं विसस्मार, कालेन स पेन्शनाख्यवृत्तिं लब्ध्वा स्वदेशं गतोऽपि यावज्जीवं प्रतिमासं विद्योदयप्रकाशसाहाय्यार्थं तस्मै पञ्चविंशतिमुद्राः प्रददौ। तस्य स्वर्गारोहणाद् वर्षैकानन्तरं तत्पुत्रेण तद्दानस्यावरोधः कृतः। एतावन्मात्रमस्य चरितम्।

अथेदानीं तत्कृतानां निबन्धानां नाममात्रेण परिचयं दत्त्वा प्रबन्धोऽयमुपसंह्रियते, किंच ततः पूर्वं तद्गतमवश्यज्ञातव्यं किमप्यन्यदपि प्रस्तूयते।

विद्यते किल वङ्गेषु च वङ्गसाहित्यस्य कृतेऽशेषतः कृतप्रयत्नस्य तस्य लोकोत्तरा ख्यातिः। कति नाम स्वनामख्यातानि सामयिकपत्राणि तस्यालौकिकप्रतिभासुषमाकलितप्रबन्धप्रसूनैः संमण्डितान्यासन्, कति चाङ्गलसंस्कृतग्रन्थास्तदनुवादालोकं लभ-

माना वङ्गीयपाठकेषु नलिन्य इव सौरकरस्पर्शात्, कुमुदिन्य इव चन्द्रकिरणावलेपात् विशदा विकसिताश्चैव देदीप्यन्ते, तेषु च वङ्गेषु धर्म्माद्याचारेषु प्रमाणत्वेन गृहीतानां स्मार्त्तभट्टाचार्य्यापरनामश्रीमद्रघुनन्दनविरचितानां "स्मृतितत्त्वनिबन्धानां" वङ्गानुवादोऽस्याक्षयकीर्त्तिमुद्‌बोधयति, यावदेव वङ्गेषु हिन्दुसमाजः स्थास्यति तावदेवास्य सा कीर्त्तिरक्षुण्णा वर्त्तिष्यते । समीचीनमेवोक्तं वङ्गीयविद्वत्कुलवरेण्यैर्महामहोपाध्यायचन्द्रकान्ततर्कालङ्कारमहोदयैः शास्त्रिणमुद्दिश्य……"परं हर्षपरम्परा—परतन्त्रचित्तोऽद्याहं संवृत्तोभवत्कृतमनुवादं दृष्ट्वा कतिपयानां तत्त्वनिबन्धानां, कृत्याऽनया हि भवतोऽस्मत्समाजः स्वयं रघुनन्दनादपि भवत्सविधे चिरं कृतज्ञताकलितः स्थास्यति, यतोद्यैतावत्कालं दुर्गमसंस्कृतेन निबद्धतया तेते प्रबन्धाः साधारणजनहृदयेष्वनारूढ़पदाः, सुष्टिमेयविद्वन्मात्रालोचनविषया एवासन्, अधुना तु ते भवतः सरल-प्राञ्जलभाषानुवादेन सम्यगुन्मीलिता इव विकसिता इव प्रस्फुटिता इव निखिलवङ्गवास्तव्यानां मनःसमाकर्षणसमर्था भवेयुः, भवेदमीभिश्च का नाम परोपकृतिः समाजस्याधुना प्रबलधर्मविप्लवसंक्षोभकरेऽस्मिन् दुर्दिने ।" इति.

एवंहि बहुधा बङ्गभाषा तदुपचारात् परं सम्भाविता लोकलोचनेष्वभूतपूर्वां श्रियं धत्ते । वङ्गेषु न कोप्यस्ति यो न जानाति तस्य सुप्रथितं नाम। सुविरला एव जना जायन्ते ये नामैवं ख्यातिं लभन्ते। अस्य च बहवोऽन्तेवासिनो देशेषु प्रख्याताः, केचिच्च तेषां महामहोपाध्यायपदसमलङ्कृताश्च संजाताः, येषां खलु कलिकातासंस्कृतविद्यालयप्रधानाध्यापक-महामहोपाध्याय—श्रीप्रमथनाथतर्कभूषण,—पण्डितप्रवरश्रीपञ्चाननतर्करत्न,—पण्डितप्रवर—श्रीदुर्गाचरणवेदान्ततीर्थ-

पण्डितप्रवरश्रीवीरेशनाथकाव्यतीर्थप्रमुखाः अध्यापनकर्मणि वङ्गेषु परां प्रतिष्ठामापन्नाः ।

प्रचरतितरां विमलशशधरकरोज्ज्वलं श्रीमद्धृषीकेश-शास्त्रिणां यशो निखिलभारतेषु, मन्ये बाणभट्टाद्युपभुक्तयशसो न कथमपि तल्लघीयः । बाणभट्टरचनारीत्या तल्लेखनपद्धतिं तुलयद्भिर्गुणग्रहणैकव्रतधरैः सुदूरहरिद्वारान्तर्गतज्वालापुरस्थ-महाविद्यालयाध्यापकान्यतमै 'भारतोदय'-सम्पादकैर्विद्वद्वरैः श्रीमद्भिः पद्मसिंहशर्मविद्याविनोदमहोदयैः सुष्ठु खलु विचारितम्.........
"निबन्धानेतानवलोक्य न केवलं जीवति खलु संस्कृतभाषेति प्रत्ययः सुदृढो भवति, सन्तीदानीमपि वाणसरणिमनुसर्तुं तामति-शयितुञ्च शक्ता लेखकधौरेयाः, ये हि स्वप्रतिभाबलेन नवनवान्प्रकारानुद्भाव्य गद्यकाव्यानां, ह्रेपयन्ति 'निर्जीवा संस्कृतभाषेति'-वादिनः, समुल्लासयन्ति साहित्यचन्द्रचकोरचेतांसि, प्रीणयन्ति विबुधजनमनांसि, प्रकाशयन्ति चात्मनोऽसाधारणं वैदग्ध्यम्, संस्कृतानुरागञ्चेत्यादिविचारपरम्परा विचक्षणसहृदयहृदयमधिकुर्वन्ति । आबाल्यादधीयाना वयं 'विद्योदयं' नितरां निर्वृति-माप्नुमः, निर्व्याजं कथयामश्च कादम्बरीप्रणेतुर्वर्णनशैली यदि केनाप्यंशेन क्वाप्युपलभ्यते तर्हि विद्योदयसम्पादकनिबन्धेष्वेवेति।

अतएव सन्तोष्याः खलु विद्योदयतत्तादृक्लोकोत्तरनिबन्ध-पिपठिषवो जनाः । प्रकाशनीया च जन्मान्तरापन्न—वाण-श्रीहृषीकेशमहाविदुषां यशश्चन्द्रिका, यदालोके संचरन्निदानीं-तनसंस्कृताध्येतृवर्गो न प्रस्खलेत् रचनाभ्यसनमार्गे".........
इति विचारयद्भिरस्माभिर्निबन्धानामेषां प्रकाशनं सर्वात्मना-भिनन्दितमेव ।

अथेदानीं तत्कृतानां निबन्धानां नाममात्रेण परिचयं दत्त्वा प्रबन्धोऽयमुपसंह्रियते :—

संस्कृतपुस्तकानि :—

(१) सुपद्मव्याकरणव्याख्यानम्।
(२) कवितावली।
(३) राजपुत्रागमनम् (अधुना दुर्लभत्वमाप्तम्)।
(४) प्राकृतव्याकरणम् (इङ्गरेज़ी-अनुवाद सहितम्)।
(५) संस्कृतश्रुतबोधः।
(६) प्रबोधचन्द्रोदयनाटकव्याख्या।

हिन्दीपुस्तकानि :—

(१) छन्दोबोधः।
(२) अर्थसंग्रहानुवादः।
(३) दत्तक-चन्द्रिकानुवादः।
(४) तर्कामृतानुवादः।

(एतानि लवपुरे लालामिहिरचन्द्रेण प्रकाशितानि, इदानीं लभ्यानि न वेति न ज्ञायते।

वङ्गभाषापुस्तकानि :—

(१) हिन्दी-व्याकरणम्।
(२) बंगाला-व्याकरणम्।
(३) मेघदूतपद्यानुवादः।
(४) उद्वाहतत्त्वानुवादः।
(५) तिथितत्त्वानुवादः।
(६) प्रायश्चित्त-तत्त्वानुवादः।
(७) श्राद्धतत्त्वानुवादः।
(८) शुद्धितत्त्वानुवादः।
(९) मलमासतत्त्वानुवादः।
(१०) शाण्डिल्यसूत्रानुवादः।

उपसंहृतिः।

विगत-डिसेम्बर-मासस्य नवमे दिवसेऽस्माकं समधिका-धन्यतया वा भारतभूमेर्दुरन्तदुर्ग्रहावग्राहितविग्रहतया वा संस्कृतसाहित्यस्य चावसानसमयसमासादनाद्वा सोऽयम् महात्मा प्रबलसान्निपातिकहतकाक्रान्तः सहसैव पुण्यकर्म्मणामन्तरायभूतं भूतसम्भूतं नश्वरं देहं परित्यज्य विहाय चैकपदे सर्व्वं मायाप्रपञ्चं निक्षिप्य हि चतुरः पुत्रान् विषमसंसारार्णवस्रोतसि, सर्व्वांश्च देशवासिनः अकूलशोकसागरे प्रक्षिप्य स्वस्थानं स्वर्गं प्रति प्रचलितः। तदन्तर्धानान् न केवलं तदात्मीया अधन्याः संवृत्ताः, अपि त्वद्य गीर्व्वाणवाणी तरणीव कर्णधारहीना, रमणीव प्रनष्टभर्तृका, रजनीवास्तमिततारका विलुप्तचन्द्रिका वा सर्व्वथा भ्रष्टश्रीका अनाथा संजाता। अनाथश्च जातोऽद्य "विद्योदय" स्तदीयाप्रतिमप्रतिभासुषमासंवर्द्धितः आजीवनं सबहुमान—लालितस्तस्य स्वलेखनीजातसुतः। अस्माकञ्च तदीयजीवद्दशायां "प्रबन्धमञ्जर्य्या" अस्याः प्रकाशनरूपमनोरथपरम्पराया अतटप्रपातो विघटितः। अहो! कुतोऽद्य स गतो योहि संस्कृतसाहित्यक्षेत्रेषु एकच्छत्रः सम्राट् आसीत्,—यस्य हि लेखनीसम्पर्कात् सविशेषं महीय्यमाना संस्कृतभाषा मृतत्वेन ख्याताऽपि सर्व्वथा जीवितवत् सहृदयजनमनांस्यधिकुर्व्वाणासीत्,—यस्य च विचित्ररचनानिपुणकरावलेपात् बहुलार्थालङ्कारविलसिता अनुपमकान्त्यौदार्य्यसौष्ठवादिसम्भाविताावयवा सम्मोहनपदन्यासा कामिनीव समुत्कलितभावा काव्यरसिकानां हृदयं हरतिस्म। अहो, तेन ह्यु परतोऽद्य विद्यानां निलयो गुणानामाश्रयस्तेजसां निधिर्ज्ञानस्याम्बुधिः। किन्तु किं करवाम वयं सर्व्वथा दैवहतकप्रति-

रुद्धभाग्यप्रसराः,—तदीयामितशक्तिशृङ्खलितकरचरणाः,—निरन्तरमेव जने जने कृतान्तहतकस्यानन्तप्रभुतां विचिन्वानाः,—तत्प्रभावाच्च सत्यपि दर्शनेन्द्रियेऽन्धाः,—अविकले च वागिन्द्रिये मूकाः,—यथावस्थिते च श्रवणसाधने वधिराः,—स्फुरति च जीवितेसंज्ञाहीनाः, जड़वत् प्रतीयमानाः,—स्वाच्छन्दशून्याः। अविरलनयनाम्बुमोचनमन्तरेण नोपायान्तरमवलोकयामः। अथवा किं मुधा मन्युना, किंवा फलं पितृलोकं प्रति प्रस्थितस्य कृते तदीयस्वर्गसुखस्यान्तरायभूतेन वृथाश्रुपातनेन।

अतः सर्व्वथा धैर्य्यमवलम्ब्य तमेवोद्दिश्य गायामः—

"संगच्छस्व पितृभिः संयमेनेष्टापूर्तेन परमे व्योमन्।
हित्वायावद्यं पुनरस्तमेहि संगच्छस्व तन्वा सुवर्चाः॥"

(ऋग्वेदे १० म० १६ सू० ४ ऋ०)

अथ मङ्गलाचरणम् ।

मातः ! प्रबोधमनुयाहि विकासय स्वं
नेत्रत्रयं विकचतामरसाभमाशु ।
त्वद्बोधनं जननि ! सोत्सुकमीक्षमाणं
पश्याद्य भारतमिदं चरणाश्रितं ते ॥ १ ॥
दृष्ट्वा शरत्समयमस्तघनान्धकारं
निद्रां जहाति नलिनीवनराजिलक्ष्मीः ।
चन्द्रो विभाति विमले गगनेऽस्ततन्द्र-
स्तन्द्रापहारसमयश्च तवायमम्ब ! ॥ २ ॥
निद्रासि चेद्भगवती भवदुःखहन्त्री
चैतन्यरूपिणि ! शिवे ! जडवच्चिराय ।
हा हन्त हन्त शरणं वद कां व्रजामः
का वाऽस्ति नः शुभकरी जननि ! त्वदन्या ॥ ३ ॥
वागीश्वरी त्वमपि भूपतिराज्यलक्ष्मीः
शक्तिस्तथा विजयिनी युधि विघ्नहन्त्री ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
सर्वं विनिद्रितमहो त्वयि निद्रितायाम् ॥ ४ ॥
त्वं देवि ! भारतभुवां परमार्त्तिहन्त्री
दुर्गा च दुर्गभवसागरनौस्त्वमेव ।
तन्निद्रितां भगवतीं प्रसमीक्ष्य चित्ते
शान्तिर्न नो नहि पुनर्वपुषोऽपि पुष्टिः ॥ ५ ॥
तद्बोधयामि शुभदेऽम्ब सबान्धवस्त्वां
दुर्भिक्षदुःसहशरीरजरोगतप्तः ।
उद्बोधनेन तव बोधमुपैतु भूयो
वागीश्वरी च कमला विजयोऽर्थसिद्धिः ॥ ६ ॥

*(१)

यन्नामाक्षरवैपरीत्यजपतोऽप्याद्यः कवीनामभू—
द्दस्यूनां प्रवरो वरो जडधियां रत्नाकरो दुर्म्मतिः।
कालाम्भोधर-कान्तिकान्तमनिशं तं देवमिष्टं स्मरन्
मन्दोऽहं रचयामि संस्कृतगिरा गद्यैर्निबन्धावलीम् ॥

(२)

वितरतु रघुदेवः सेव्यमानोऽतिभक्त्या
शुभमविरतमेतत्पाठकेभ्यः सदैव।
विरसमपि कटाक्षप्रेक्षितं तेन सर्व्वं
भजतु सरसभावं वाक्यजातं ममात्र ॥

(३)

कालाद्दैन्यमुपेतवेदविहिताचारस्य संरक्षणं
मिथ्यागर्व्वपरीतमानवकृतेर्निःसारतादर्शनम्।
सर्व्वस्यैव जनस्य राजनि सदा सद्भावसंवर्द्धनं
लक्ष्यीकृत्य विनिर्म्मिता ननु मया गद्यैर्निबन्धावली ॥

---

* एतन्मङ्गलाचरणस्यादिमाः षट् श्लोका एतन्निबन्धकर्त्तस्यौदुर्गाप्रबोधनाभिधपद्यावलीतः संगृहीताः। अन्तिमास्त्रयस्तु प्रबन्धकर्त्रिः प्रकाशयितुरनुरोधात्प्रबन्धमञ्जरीमङ्गलाचरणार्थमेव विरचिता आसन्। (प्रकाशयिता)

विबुधामन्त्रणम् ।

अहो ! सम्प्रति हि भारतेऽस्मिन् व्यसनसम्पर्कात् सद्विद्येव, अनीति-संसर्गाद्राज्यलक्ष्मीरिव, शाठ्ययोगाच्चिरमैत्रीव, महामारुतसम्बन्धाद्दीपशिखेव, प्रबलकलिकालप्रवृद्धानां बहुविध-विरुद्ध-धर्माणां पुनः पुनः सङ्घर्षात् सुभृशं क्षीणत्वमुपागता वेदविद्या, सम्यक्क्षीणश्चाभवत्तन्मूलकः सनातनो वर्णाश्रमधर्म्मः । येनेदानीं सर्व्व एव धनिनो, दरिद्रा, विद्वांसो, मूर्खा, युवानो, वृद्धाः, स्त्रियः पुमांसश्चानादृत्यैकपद एव शास्त्रानुशासनानि, अवधीर्य्य कुल-क्रमादृतशिष्टाचरणानि, अविगणय्य महाजनचरितानि, समुन्मूल्य च समाजबन्धनानि यथेच्छमाचरन्ति, यथेच्छं व्यवहरन्ति, प्रवर्त्तन्ते नित्यं समुद्धतश्चोच्छृङ्खलश्च । शिष्या गुरून् वञ्चयन्ते गुरुकृतन्यासान् हरन्ति, समाजेषु तेषामलीकदोषानाख्यापयन्ति च, तथैव गुरवोऽपि शिष्यधनान्यपहरन्ति मोहयन्ति चताननेक-विधकपटाचरणैः, इत्थं सर्व्वत्रैव सुमहान् विपर्य्यासो वरीवर्त्ति । तथाहि—साम्प्रतं न पितरौ सम्मानयन्ति, न गुरूनाद्रियन्ते, न हित-वचनान्याकर्णयन्ति, नापि कुलगौरवमपेक्षन्ते, न बिभ्यति परलोकात्, न त्रस्यन्ति कौलीन्यात्, न लज्जन्ते गर्हिताचरणात्, न विरमन्त्यधर्म्मात् । नार्च्चयन्ति महर्षीन्, न तर्पयन्ति पितॄन्, नाप्यनुवर्त्तन्ते शिष्टान्, न पूजयन्त्यतिथीन्, न वा श्रद्दधत्याप्त-वचनेषु, नैव जिज्ञासन्ते धर्म्मेषु, ; किन्तु सर्व्वएव समीहन्ते नित्यमेव केवलैहिकसुखसंवर्द्धनाय, प्रयतन्ते तेन तेनासदुपायेना-र्ज्जयितुमर्थान्, चेष्टन्ते निरन्तरं यथायथमपि संग्रहीतुं विषयान्,

---

* २२ खण्ड—११ संख्या।

समाश्रयन्ति कूटकापट्यान्यालम्बन्ते वकव्रतं, चिकीर्षन्ति निभृतं परापकारं, द्विषन्ति परगुणानसूयन्ते परोत्कर्षाय, निन्दन्ति साधु-चरितानि, प्रदर्शयन्ति सर्वत्रात्मोत्कर्षं, स्तुवन्ति निस्त्रपमात्मानं, स्वयमाचक्षते च सप्रगल्भमात्मयशः। अर्थलोभादेते शुश्रूषन्ते नीचानपि, प्रतिगृह्णन्त्यसज्जातीयेभ्योऽपि। श्वान इव मुहुस्ता-डिता अपि, मुहुरपमानिता अपि, मुहुर्दूरीकृता अपि सेवन्त ईश्वराणां द्वाराणि, तोषयन्ति चाटुवचनै र्धनिनां मनांसि, भवन्ति रजःकणा इव च प्रभावशालिनां चरणतल-लग्नाः, व्यवहरन्ति परमधार्म्मिका इव धार्म्मिकसमाजेषु, नास्तिकगोष्ठीषु च महा-नास्तिका इव।

किञ्चैषां स्नेहो वा दया वा, प्रेम वा, वात्सल्यं वा, सौहार्द्दं वा, कुटुम्बिता वा, न्यायपरता वा, धर्म्मानुसृतिर्वा सर्वाण्येतानि स्वार्थमपेक्ष्यैव प्रवर्त्तन्ते। स्वार्थसाधनायैते वज्रादपि कठोरा भवन्ति, राक्षसेभ्योऽपि नृशंसमाचरन्ति, विकाराक्रान्ता इव न स्वजनमपि विजानन्ति, न्यायपरतामनीतिमिव परिवर्ज्जयन्ति, धर्म्ममपि तृणाय मन्यन्ते। अन्यच्च—

नैते स्वार्थस्य कृते जातिं विचारयन्ति, न शौचमाद्रियन्ते, न नियमान् प्रतिपालयन्ति, न यमाननुतिष्ठन्ति न वा सदाचारान-वलकोयन्ति, नाप्यात्मावमानमाकलयन्ति, न च महापातकान्यपि समीक्षन्ते। पिबन्ति मद्यं, भुञ्जते म्लेच्छान्नमभिदधते सहस्र-शश्चानृतानि, अभिसन्दधते शतशो विश्वस्तान्, जिहीर्षन्ति सर्व्वस्वं पश्यतामेव सद्वृत्तानां दयार्द्रहृदयानां प्रभूणाम्। स्वार्थ-लिप्सान्धितधियामेषां योजनसहस्राण्यपि न दूरत्वेन विभाव्यन्ते, चिरसुहृदामप्युपरि वैरिव्यवहारो भवति, स्थिरपरिचयोऽपि न स्मृतिमुपैति, अपवित्राण्यपि पवित्राकारं दधते, अधर्म्मो अपि धर्म्मरूपेण प्रतिभान्ति। ततश्च यद्यत् शास्त्रविगर्हितं वा, धर्म्म-

विगर्हितं वा, लोकविद्विष्टं वा, स्वभावकलुषं कर्म्मैतेभ्यो रोचते, तत् सर्वं निःशङ्कं, निर्बाधं, सप्रगल्भं च सुकृतमिवानुतिष्ठन्ति।

इत्थं प्रबलकलिकालप्रभावाद्वा, पुनः पुनर्वैदेशिकविरुद्धधर्म्मसङ्घर्षाद्वा, ऊनविंशशताब्द्यवसानोन्नतसभ्यताप्रादुर्भावाद्वा स्वस्ववंशस्थितिमुल्लङ्घ्य, शास्त्रविहितस्व—स्व—जातीयकर्माण्यपि परिहृत्य विमार्गप्रस्थितेषु वर्णाश्रमाचारिमानवकुलेषु कर्म्मक्षेत्रस्य भारतवर्षस्यापि महान् दशाविपर्य्ययः सञ्जातः। यद्धि भरतक्षेत्रं पुरा पुण्यकर्म्मणां, पवित्रधर्म्माणां, सदाचाराणां साधुविद्यानां मधुरकलानां, साधुभावस्य, समुन्नतेः सभ्यतायाश्च शिक्षाभवनमादर्शस्थानञ्चासीत्, यत्र हि देशान्तरेभ्यो राज्यान्तरेभ्यो द्वीपान्तरेभ्यः सागरपारेभ्यो दिगन्तेभ्यश्च तथा हि—सर्वदोद्यद्ग्रहतारानिकराभिनवपाटलप्रभापटलोपरञ्जितैः सद्य उपजायमानकिसलयजालैरिव तरुगहनैरुपशोभितशिखरदेशादा उदयाचलात्, समन्तात् सञ्चरद्वरुणराजहंसदेहद्युतिधवलितावयवान्निरन्तरभगणास्तदर्शनत्रासपाण्डरादिव आ चरमाचलात्, घनीभूततुषारराशिकृतजडिम्नः सध्रुवसप्तर्षिमण्डलपादस्पर्शजनितानन्दजडादिवाऽधनददिङ्मुखभागादा च कौशिकतपःप्रभावरचिताभिनवसुरलोकाधिष्ठितत्रिशंकुतिलकाद्दक्षिणाशामुखात्, प्रत्यहं नवा नवा मानवा विनयावनता बद्धाञ्जलय आगत्यागत्य आन्वीक्षिकीषु, दण्डनीतिषु, वार्त्तास्वर्थशास्त्रेषु, पुराणेतिहासेषु, काव्यालङ्कारेषु, षड्दर्शनेषु, शिल्पकलासु, सङ्गीतशास्त्रेषु, गीतरचनासु, काव्यनिर्माणेषु, योगरचनावाक्यप्रयोगेषु, नाटकाभिनयेषु, नयेषु, विनयेषु, सदाचारेषु, सभ्यव्यवहारेष्वपरेषुच मनुष्यतासम्पादकगुणग्रामेषु शिष्यत्वमापद्य शिक्षामलभन्त। असेवन्त चाहमहमिकया यत्र सम्राडधिष्ठितमहानगरगोपुरं प्रतिदिवसं स्वदेशसम्भूतप्रभूतमहार्हरत्नोपायनपाणयो द्वीपान्तरागताः प्रणताः करदीकृ

भूमिपतयः। यत्रोषस्सु प्रत्यधिष्ठानं, प्रत्यायतनं प्रतिग्रामं, प्रतिनगरं, प्रत्याश्रममधितीर्थस्थाननिवहं च मठेषु वटुभिरुदात्तादिस्वरभक्त्या पाठ्यमानवेदपाठध्वनिभिर्मध्याह्ने मधुरस्वाध्यायाभ्यासशब्दैर्यजमानैर्यथाविधिविधीयमान-यज्ञकर्म्मोचाच्चार्यमाणमन्त्रशब्दैश्च सायं द्विजगणोपह्रियमाणसूर्य्यार्घ्यमन्त्रध्वनिभिस्त्रिसन्ध्यं द्विजातिगणजप्यमानाघमर्षणसूक्तनिर्घोषैश्च संपूरितं, क्षालिताशेषकल्मषं नितरामनिर्वचनीयमानन्दमन्वभवच्छ्रोत्रयुगलम् । यत्र निरन्तरं दिगन्तप्रतिध्वनितैर्वीराणां सिंहनादैः, सेनानां जयघोषैः,—धनुष्मतां कोदण्डटङ्कारैः, सूतमागधादिस्तुतिपाठकानां विजयसङ्कीर्त्तनैर्जयिनामानन्दकोलाहलैः सर्वथा सुस्थचेतसां जानपदानां सोल्लासकलकलैश्च समन्तान्महोत्सवमयमिव, नित्यानन्दमयमिव चालक्ष्यत, यत्र च सद्योहुतानेकविधपूतहव्यानां मधुरस्निग्धगन्धानादायादाय मन्दमन्दसञ्चारी मलयमरुन्निपुणोभिषगिव त्रिसन्ध्यं ग्रामनगरायतनेषु परिभ्रमन् जनानां बाह्यान्तरमान्द्यमपनिनाय । उत्तस्थौ च यत्र सर्व्वेष्वेव प्रदेशेषु प्रतिदिवसाघमर्षण-मन्त्रोच्चारणभस्मीभूताशेष—पापभार-भस्मराशिरिव, सनातनधर्मायतनपताकावलीव पवनान्दोलिता पारावतधूसरा सद्योहुतहुताशनोत्थिता प्रगाढ़धूमलेखा त्रिसन्ध्यमग्निहोत्रिणां गृहेभ्यः। यत्र च चातुर्वर्ण्यविभागाद् ब्राह्मणाः शास्त्ररहस्यालोचने, क्षत्रिया राज्यशासन-क्रियायां, वैश्याः क्रयविक्रयादिवाणिज्यव्यापारेषु, शूद्राश्च गृहनिर्माणवस्त्रवयनचित्रकर्म्मादिशिल्पानुशीलने नियुक्ताः स्वस्ववृत्तेरुत्कर्षं साधितवन्तः, कृतवन्तश्च ब्राह्मणा ज्ञानचक्षुरुन्मीलनेन, क्षत्रियाः सततं शान्तिस्थापनेन, वैश्या धनसंवर्धनेन, शूद्राश्च तत्तदभीप्सितद्रव्योत्पादनेन परस्परं परस्परस्य साहायकम्। तेन युगपदेव भारते बाह्याभ्यन्तरीणोन्नतिर्लब्धाधिकाराऽचिरेणैव परां काष्ठां प्राप। तदानीं

भूमिश्चेयं सर्वविषय एव निष्प्रतिद्वन्द्वा बभूव। परमिदानीं सैव भूमिः, स्वधर्मपराङ्मुखतया स्वकर्म्मविरतेषु वर्णाश्रमचारिषु, सम्यगुन्मूलितायाञ्च चातुर्व्वर्ण्यव्यवस्थायां, विलुप्तप्रायेषु चैकैकशो वर्णाश्रमाचारेषु, हीनवीर्य्या, निर्मर्य्यादा, निष्प्राणा, निरुत्साहा, निष्प्रभा निरुत्सवा, निहतगौरवा, हृतसर्वस्वा, दीना, क्षीणा, मलिना, म्लेच्छभूमिरिव भ्रष्टाचारा सञ्जाता; कर्मक्षेत्रमप्यकर्मक्षेत्रं संवृत्तम्।

अहो! न श्रूयतेऽत्र ब्राह्मणानां वेदध्वनिर्नापि वीराणां दिगन्तप्रतिध्वानिसिंहनादो न वारातिकुलहृन्मर्मभेदी धनुष्मतां धनुषां टङ्कारः, नैव वैश्यानां वाणिज्यवादः। न वहति मरुद्धव्यगन्धान्, नोद्गच्छन्त्यग्निहोत्रधूमलेखाः। अस्मादिव कारणात् दुःखित इव न वर्षास्वपि पर्य्याप्तं वर्षति पर्जन्यो, न प्रसूते पर्याप्तानि शस्यानि भूतधात्री। दृश्यते ऋतूनामपि वैपरीत्यम्। येन सर्वत्रैव प्रसरत्यप्रतिविधेयं दारुणं दुर्भिक्षं करालकवलं वितत्य, मिलिता च तेन सह क्रूररूपा महामारी, म्रियन्ते प्रतिदिवसमसंख्या दुर्भिक्षविकला महामारीकवलिताः प्रजाः, ततः श्रूयते केवलं हृदयभेदी कर्णोपतापी मर्म्मस्पृग् दारुणो हाहारवः समन्तात्, प्रवहति तीव्रपूतिगन्धवाही सुदुःसहो नभस्वान्, उद्गच्छन्ति च निरन्तरं श्मशानभूमिभ्यो मृत्योर्जयपताकावलीव भीषणरूपाश्चिताधूमलेखाः।

नात्र क्वचिदपि निखिलशास्त्रपारदर्शिनो निखिलकलाकुशलाः पुण्यदर्शनाः, पुण्यकर्माणः, पवित्रात्मानः, पवित्रदेहप्रभोज्ज्वलाः समुज्ज्वलब्रह्मवर्चसाः, समुन्नतघोणाः प्रशस्तललाटपट्टा धौतपट्टवस्त्रभृतः, समुन्नतकायाः, समुन्नतहृदयाः, अवतारा इव धर्म्मस्य,

आश्रया इव प्रशमस्य, विलासभूमय इव दयायाः, उत्पत्तिक्षेत्राणीव सत्यस्य, कुलभवनानीव तपसां, निर्म्मला निरहङ्कारा निर्मत्सरा, विनयार्ज्जवसम्पन्नाः स्वस्वधर्मनिरताः स्वाधीनचेतसः, श्रोत्रियाः, स्नातकाः, अग्निहोत्रिणश्च, सर्वथा सुस्थशरीरा ब्रह्मकल्पा ब्राह्मणाः। सरहस्यास्त्रविद्यानिपुणा रणाङ्गनसञ्चरणदक्षा विपक्षपक्षोन्मूलनदीक्षिताः प्रज्वलितप्रतापोपहसितप्रभाकरा, महाप्रभावाः, महासत्त्वा महोत्साहा महारम्भा आजानुलम्बितभुजा अपि लघुहस्ताः, क्षयिताशेषविग्रहा अपि सुरुचिरविग्रहाः, कृतविपक्षलक्ष्मीसंग्रहा अपि वर्द्धितस्वपक्षलक्ष्मीका, अनुज्झितनया अपि विनयानुगता मूर्त्तिमत्क्षत्रधर्म्मा इव दुष्प्रधर्षाः स्वतन्त्रा राजन्यवीराः। नानादिग्देशपरिभ्रमणचतुराः, सुविज्ञाताशेषदेशतत्तदुत्पन्नपण्यजातस्वभावा आशैशवाभ्याससञ्जातवाणिज्यपाटवा अकपटव्यवहारिण उदाराशया उदारसमृद्धिसम्पन्ना वैश्यतनयाः। तथा हृष्टपुष्टावयवाः सदासन्तुष्टहृदया अत्युत्कृष्टशिल्पसंवर्धनपरा धर्म्मानुरागिणः स्वकर्म्मनिरताः शूद्रजातीया वा स्वच्छन्दञ्चञ्चूर्य्यमाणा दृश्यन्ते। दृश्यन्ते तु केवलं भ्रष्टाचारा निकृष्टव्यवहाराः स्वधर्म्मपरिभ्रष्टाः, पापक्लिष्टाः, धृष्टस्वभावाः, शोकतापाविष्टहृदया, अवतारा इवाधर्म्मस्य, सहचरा इव कलियुगस्य, निवासा इव यथेष्टाचारस्य, आश्रया इव गर्हितकर्म्मणां, उत्पत्तिक्षेत्राणीव छलानृतप्रतारणानां, कुलभवनानीव रोगदुर्भाग्यदारिद्र्याणां विश्रामस्थानानीव महापातकानां विलासभवनानीव क्षुद्रतायाः, कृशकाया अकालोत्पन्नजराशिथिलितदेहबन्धना दुर्भिक्षजर्ज्जरीकृता जीर्णाः शीर्णा मलिनाश्छिन्नवाससो हताशाः कङ्कालशेषाः पिशाचपरिवारा इव समन्ताच्चङ्क्रम्यमाणा जीवन्मृता मानवाः। सङ्घटन्ते चेतोप्यधिकक्लेशप्रदानि वर्णयितुमशक्यान्यनिष्टसहस्राणि, चिन्तापरिक-

ल्पितेषु च येषु द्रवति हृदयं, विकलीभवत्यन्तरात्मा, व्याकुलीभवति चित्तम्। उत्क्रामतीव प्राणवायुर्न धैर्यमेति जीवात्मा, न निःसरति वाणी न प्रसरति लेखनी, भवन्ति च निश्चेष्टानीन्द्रियाणि। सम्प्रत्येकैवावस्था चतुर्वर्णानाम्। सर्व्वं एव श्ववृत्त्या वर्त्तयन्ति, श्ववृत्तिमेव बहुमन्यन्ते, ततश्च विस्मृतस्वगौरवा विस्मृताभिमानाः श्वान इव लिहन्ति नीचवर्णीयानामपि स्वप्रभूणां चरणतलरजांसि, भुञ्जते तेषामुच्छिष्टानि, सहन्ते चानिर्व्वेदं तेषां चरणप्रहारान्। अन्त्यजा अप्युच्चासनं भजमाना ब्राह्मणान् वाहयन्ति, ब्राह्मणाश्चानिर्व्वेदं बद्धाञ्जलयस्तेषां पुरतः प्रणमन्ति। न ज्ञायतेऽपरं वा किं भविष्यतीति!

अथेदानीं साभिनिवेशं विविच्यमानेषु भारतीयपूर्वापरावस्थाभेदेषु शास्त्रविहितसनातनवर्णाश्रमधर्मपरित्याग एवैतस्य शोचनीयस्य दशात्ययस्य निदानतया प्रतिभात्यस्माकम्। यतो यावच्चतुर्वर्णविभागो वर्णाश्रमधर्म्मानुरागश्च प्रजानामवर्त्तत, तावदेव भारतस्य समुन्नतिरासीत्। तदपगमे च यादृग्दुर्द्दशा भारतस्यापतिता सा हि सर्वेषां प्रत्यक्षगोचरैव। अतो भारतभूमेः समुन्नतिसम्पादनं, पूर्वगौरवस्थापनञ्च प्रति वर्णाश्रमाचारस्य पुनः पूर्ववत्प्रचारणमपहाय नास्त्यन्यः कोऽप्युपायः। अतएव भारतस्य प्रकृतं हितं कामयमानैः सर्व्वैः सर्वात्मना सर्वदैव तथा यत्नः करणीयो यथा पुनरेव चातुर्व्वर्ण्यव्यवस्थाया वर्णाश्रमाचारस्यच पूर्ववत् प्रचारो भवेत्, भवेयुर्ब्राह्मणाश्च पुनरेव ब्राह्मणा इव क्षत्रियाश्च क्षत्रिया इव, एवमन्येऽपि वर्णा यथा पूर्व्वरूपतामापद्येरन् तथैव यत्नः करणीय इति। कर्म्मभूमिरियं यथावदनुष्ठितैस्तैस्तैःशास्त्रविहितकर्मभिरेवोन्नतिमर्हति। न च भोगभूमीनामिवैहिकभोगमात्रसाधनान्यशास्त्रीयाणि कर्म्माण्यस्याः किमप्युपकर्त्तुं क्षमन्ते।

अथापेक्षिते वर्णाश्रमाचारप्रचारे प्रथममपेक्षणीयं भवति वेदवेदाङ्गप्रभृतीनां प्राचीनशास्त्राणां सम्यगालोचनम्। शास्त्राणां सम्यगनुशीलनमन्तरेण हि न कदापि वर्णाश्रमाचाराणां प्रचारः सम्भवति। अपेक्षते च शास्त्रानुशीलनं प्रगाढ़व्युत्पत्तिञ्च संस्कृत-भाषायाम्। सर्वाणि खलु शास्त्राणि संस्कृतभाषायां लिखितानि, विना संस्कृतज्ञानं दुर्लभमेव शास्त्ररहस्यविज्ञानम्। संस्कृत—व्युत्पत्तिः पुनरपेक्षतेऽद्यापि शास्त्रालोचनमात्रनिरतानां ब्राह्मण-कुलधुरन्धराणां विदुषां साहायकम्। ततश्च भारतस्य पूर्व्वगौरव-मवस्थापयितुमिच्छुभिः प्रथममेव प्राचीनशास्त्रव्यवसायिनां विदुषां ब्राह्मणानामाश्रयो ग्रहणीयो यथाशक्ति तेषां पुष्टिश्च साधनीया। इत्येवालोच्य मनसि वयं तान् भारतीय-विलुप्त-पूर्व्वगौरवावशेषचिह्नभूतान् शास्त्रमात्रकृतश्रमान् विदुषो ब्राह्मणान् शरणं प्रपन्नाः स्मः।

अयि भो विद्वद्वरा भूमिदेवाः! तत्रभवन्तो यदस्मिन्नैहिक-सुखमात्रसम्पादनप्रबललालसोद्दीपनेऽपि कलिसमये तदुद्देश्यसा-धकप्रभूतार्थोर्ज्जन-साधन-राज-विद्याभ्यासपराङ्मुखास्तत्प्रत्यर्थि-भतां दारिद्र्यमात्रफलकां भारतीयप्राचीनविद्यां प्रत्यनुक्ता अन-न्यव्यापारास्तामभ्यस्यन्ति तदाश्रयेण च जीवितमतिवाहयन्ति, एतदेवाख्यापयति श्रीमतां भवतां विमलार्यवंशजन्मोचितं हृद-यस्य सुमहदौदार्य्यमन्तःकरणस्यानुपममाहात्म्यं तथाद्यापि भवतां धमनीषु तदतिपूतार्यरक्ताविच्छेदप्रवहणञ्च।

लक्ष्मीसरस्वत्योः स्थिरविवादाच्चिरमेव प्रचरति दारिद्र्यं पण्डितेषु, सर्वत्रैवसमाजेषु, सर्वेषु च देशेषु पण्डिता दरिद्रा भव-न्तीति प्रसिद्धमेव। दारिद्र्यं खलु भूषणमेव भवतां न दूषणमिति भवद्भिरेवार्थसाधनविद्यापराङ्मुखतया दारिद्र्याङ्गीकरणेन सुव्यक्तं संसूच्यत एव। अतएव प्रबलदारिद्र्योपहतेष्वपि युष्मासु निश्चर्य

प्रवर्त्ततेऽभ्यर्थनमस्माकम् । भवन्तो यथा भारतस्य विलुप्त-पूर्वगौरवावशेषचिह्नभूतास्तथा पुनरारोपिष्यमाणमहत्त्वस्यापि मूलभित्तिस्वरूपा एव। ये खल्विह तन्नभवतो भवतः परित्यज्य भारतस्य पूर्वगौरवं प्रतिष्ठापयितुमीहन्ते, ते भृशमविवेका महा-मूर्खा मूलमाहत्य शाखास्वेवाभिषिञ्चन्ति। यथा हिमालयाद्याः कुलपर्व्वता मुहुःप्रबलवैदेशिकविपक्षपक्षसगर्वपदाघातजर्ज्जरितं शीर्णप्रायं भारतस्य भौतिकशरीरं सन्धारयन्ति भवन्तोऽपि निरन्त-रविविधविरुद्धधर्म्मसंघर्षक्षयितसत्त्वमासन्नतरावसानं वर्णाश्रम-कर्मोपदेशपरं कर्मभूमेर्जीवितभूतं धर्मशास्त्रनिचयम्। यदि भवन्तो नाभविष्यन्, न जानीमहे, का गतिरभविष्यत् प्राचीनशास्त्रा-णाम्, मुहुर्मुहुः सङ्घटितेषु हि प्राचीनधर्म्मपुस्तकविलोपहेतुभूतेषु राष्ट्रोपप्लवेषु, धर्म्मविपर्ययेषु, प्रत्यहं सहस्रशो भस्मावशेषीकृ-तेषु, दुर्दान्तयवनभूपाज्ञया नानाविधसंस्कृतनिबन्धेषु, समुचित-यत्नाभावात् कीटमूषककवलितेषु च निरन्वयपण्डितगृहस्थि-तानेकशास्त्रग्रन्थेषु, ग्रामदाहभूमिकम्पाद्युत्पातपरम्पराविनष्टेषु चासंख्यप्रबन्धेषु यदद्यापि वेदवेदाङ्गप्रभृतीनि वर्णाश्रमाचार-मूलानि शास्त्राण्यसंख्यानि च दर्शनेतिहासपुराणानि लभ्यन्ते, तत्र भवतामनन्यसाधारणस्वधर्म्मानुरागस्यैव हेतुता। अतएव भवन्तो धन्याः, धन्यश्चायं देशो यत्रैवंविधाः स्वधर्म्मानुरागिणो-ऽद्यापि निवसन्ति भवद्विधाः। युष्माकममुमेवाविचलितं स्वधर्म्मा-नुरागमवलोक्य समागता वयमस्यैव स्वधर्म्मानुरागस्य दार्ढ्यमु-त्पादयितुं युष्मच्चरणमूलम्। सविनयं प्रार्थामहे च न युष्माभिः कदाचिदपि विचलितव्यमस्मात् स्वदेशोद्धरणफलकात् स्वधर्म-पालनमहाव्रतात्। सुष्ठु विजानन्त्येव भवन्तः सर्वत्र स्वधर्म्म-निरता एव सम्यक् सुखेनासते, स्वच्छन्दं सगौरवं, ससम्मानञ्च विचरन्ति, लभन्ते च स्वाभिमतां समृद्धिम्। ततश्चोक्तं लोकानु-ग्रहकारिणा श्रीमता भगवता कंसारिणा—

"स्वधर्म्मे निधनं श्रेयः" इति--

स्वधर्म्महीनास्तु नरा नैहिकं नापि पारत्रिकं शुभं प्राप्तुमीशते। ते खलु मयूरपिच्छाच्छन्नाः काका इव परैः परिभूयन्ते, स्वजातीयेभ्योऽपि परमनादरं प्राप्नुवन्ति। भवन्ति च ते इतो भ्रष्टास्ततो नष्टाः। अतएवोक्तं तेनैव :—

"परधर्म्मो भयावहः" इति च :—

विशेषतश्चिरध्वस्तजातीयगौरवाणां सुचिरमधःपतितानां हि जनानां स्वधर्म्मानुसरणं विना नास्ति कोपि पुनः समुद्धरणोपायः। ततश्चेदानीं स्वधर्म्मे पूर्वतोऽधिकं दृढीभवद्भिः श्रीमद्भिर्भवद्भिरेव भारतस्य पूर्व्वगौरवप्रतिष्ठापने पूर्व्वं प्रदर्शनीयः पन्थाः। स्वधर्म्मपरिभ्रष्टैः सहस्त्रैरपि समाजं संस्कुर्वाणैस्तथाविधैरसंख्यैरपि राजनीतिमालोचयद्भिर्न स्तोकोऽप्युपकारः सम्भाव्यते। तैः केवलमुत्पाद्यते महाजनोपहास्यता, राजपुरुषाणां विरागश्च।
किञ्चानुकूलदैवानुग्रहेण राजा स्वयमेव प्रजानां पैतृकधर्म्मरक्षणे कृतसङ्कल्पः सर्वमेव स्वधर्म्मानुसरणाय प्रोत्साहयति जनम्। न कस्याप्यभीष्टधर्म्माचरणे स्तोकमपि प्रतिबध्नाति, न वा चिराचरितानि धर्म्मकार्य्याणि व्याहन्ति, एवं स्वस्वधर्म्मप्रतिपालनानुकूले नरपतौ वर्त्तमाने यदि यूयं स्वदेशगौरवप्रतिष्ठामूलं स्वधर्म्माचरणानुकूलं पन्थानं न प्रदर्शयेत तदा युष्माकं सर्वमेवेयत्कालावधि स्वधर्म्मपालनव्रतमेकपदमेव निष्फलं भवेत्। किन्न विदितं भवद्भिः स्वदेशगौरवप्रतिष्ठापकैर्हि जनैः कति कति च दुष्कराण्यसाध्यानि कर्म्माणि सम्पाद्य, सहित्वा च निरन्तरमविच्छिन्नसुदुःसहक्लेशराशीन्, तृणवत्परित्यज्य प्राणेभ्योऽपि प्रियतराणि पुत्रकलत्राणि, विसृज्यावलीलया ज्ञातिस्वजनबान्धवान्, निगृह्य

च यावज्जीवं विषयेभ्य इन्द्रियाणि, पणीकृत्यात्मप्राणान् स्वदेशस्य पूर्व्वगौरवमवस्थापितमिति। भवद्भिस्तु न किमपि तथाविधं दुष्करमसाध्यं वा कर्म्मानुष्ठेयं, न किञ्चिदपि परित्याज्यं, न कश्चिद्विद्रोहः कार्य्यः, नाप्यालोच्या दुरवगाहा राजनीतिः, केवलं स्वधर्म्मपालनस्वीकारकृद्भूनटनश्रमेणैवाकल्पस्थायि देशोद्धरणसम्भवं निर्मलं यशो यदि लभ्येत, तदा किं न लब्धं स्यात्? अत एव भवन्तो विसृज्याकिञ्चित्करधनार्ज्जनतृष्णामविगणय्य च विघ्नसहस्राणि पितृपितामहा इव यथाविधि वर्णाश्रमाचारमनुवर्त्तध्वम्। प्रचारयन्तु संस्कृतविद्यां, प्रकाशयन्तु शास्त्ररहस्यानि, त्यजन्तु विषयपिपासां, सञ्चिन्वन्तु ब्रह्मवर्च्चसम्, परिहरन्तु शाठ्यकापट्यानृतानि, स्वीकुर्वन्तु सत्यं, प्रतिपालयन्तु यमनियमादीन्। इत्थं भवत्सु पूर्व्वप्रकृतिमापन्नेषु पुनरेव सर्व्वं यथायथं भविष्यतीत्यस्माकं ध्रुवो विश्वासः।

> "पातु पृथ्वीं नृपः स्वर्गमवत्विन्द्रस्तपस्विनः।
> वयं स्वधर्म्मं रक्षामः सर्वः स्वार्थं समीहते॥"

पुनश्च—अस्ति च "विद्योदय" नामकं बङ्गदेशीय ज़िला २४ परगणान्तरगत भट्टपल्लीतः ('भाटपाड़ा' ग्रामात्) प्रकाशितं संस्कृतमासिकपत्रमेकं भवतामुपदेशवचनप्रचारद्वारभूतम्। भवद्भिस्तद्द्वारैव लोकानामुपदेशः कार्य्यः।

किञ्चाभीप्सितकार्य्यसिद्ध्युपायादिपरिचिन्तनार्थं स्वकीये जनपदे, प्रदेशे, मण्डले वा काचित् सभा संस्थाप्या॥

उद्भिज्ज-परिषत् ।

अस्ति ह्यस्माकं किमपि बलीयः प्राकृतसौन्दर्य्यसन्दर्शन-व्यसनमाबाल्यादेव । ततश्चानन्ताविच्छिन्नस्वजनपोषणावश्यक-बहुविधव्यापारप्रवाहेभ्यः कथञ्चिद्विरामं लब्ध्वैव कदाचि-द्विजनहिमालयपादमूलं, कदाचिद्वा सर्वथा जनसम्पर्करहितं महारण्यमभिधावामः । साम्प्रतं तथाविधमवसरं सम्प्राप्य कतिपयाप्तबन्धुसमेताः कलिकातासन्निहित-'सुन्दरवन'शोभा-सन्दिदृक्षवः, कस्मिंश्चिच्छुभेऽहनि प्रस्थिता वयं, नानाजनपदा-नतीत्य कस्मिंश्चिद्दिवसे दूरमधिरूढे भगवति सहस्ररश्मौ, मकर-संक्रमजनितेषत्प्रखरभावभावितप्रभाकरकरनिकरैर्मन्दता मुपगते शिशिरशैत्ये, समन्तात् सानन्दं सक्रीडं मन्दं मन्दञ्च विच-रत्सु मृगकुलेषु, समासन्नमधुमासप्रत्युद्गमनार्थमिव नवपल्लवराग-रञ्जितकलेवरेषु वनलतातरुनिकरेषु, तत्तद्वनान्तशोभाकृष्टचेत-सोऽविज्ञाताध्वश्रमा एव तथाविधकान्तारसुलभदिग्भ्रमवारण-क्षमकतिवनेचरसहाया नानावनस्पतिलतागुल्मघनच्छायान्ध-कारितं महारण्यमध्यभागं प्रविष्टवन्तः ।

अथ तत्र प्रविशतामेवास्माकं कर्णकुहरे सहसा कश्चित्सुम-हानभ्रभेदी "साँइ साँइ" इत्यव्यक्तशब्दस्तादृशगभीरवनप्रदेशस्य स्तिमितभावमपाकुर्व्वन्, प्रविष्टः, क्षणाद्विलीनश्च । ततः कथ-मेष, कुतएष, इति तत्कारणानुसन्धित्सया समन्ताद्विक्षिप्तदृष्टय-स्तस्य महारण्यस्य सुदूरमध्यभागे सर्वथाप्राणिसम्बन्धरहिते कस्मिँश्चिदेकान्तकान्तारे समवेतसभ्यनिवहानिव श्रेणीबन्धाव-

स्थितान्, एकतानचेतसा किमिवाकर्णयत इव निश्चलनिष्पन्दान्, सञ्जातपुलकानिव निश्चलोद्ध्वींकृतपत्रान्, क्वचित्क्वचिदनुमोदयत इवेषत्सञ्चालितशिरोभागानवसरेषु प्रमोदमानानिव संघर्षितपल्लवकराग्रान् सर्वविधविटपिनोऽपश्याम। तेषामपि मध्यभागे व्याख्यानकृदिवेतस्ततः सञ्चालितपल्लवकराग्रः सुमहानश्वत्थः स्थित इति।

अथ सविस्मयं तददृष्टपूर्वं दृश्यं पश्यतामेवास्माकं सहसा सर्वविटपिपल्लवान्दोलनपुरःसरं समुत्थितः पूर्वोक्तरूपो महान् ध्वनिस्तत्क्षणं विलीनश्च। तथाविधाद्भुतव्यापारमवलोक्य समुद्रिक्तविस्मयोपहतविवेकप्रसराः कर्त्तव्यावधारणविमूढा जीवन्मृता इव, ग्रहग्रस्ता इव, भूताविष्टा इव, निश्चला, निर्व्यापाराः शून्यहृदयास्तूष्णीमेवास्मत्सहचरवनेचराणां मुखेषु दृष्टिं व्यापारयन्तः स्थिताः।

तेत्वेतावतैवोन्नीतास्मदभिप्रायाः किञ्चिद्विहस्याब्रुवन्। वृक्षाणां परिषदियमत्राश्वत्थो वक्ताऽपरे श्रोतारः। निरन्तरसहवासाद्वयमेतेषां भाषासु सम्यगभिज्ञा एव। तद्यदि भवद्भ्यो रोचेत वयमेतेषां प्रजल्पनमनुवदामः।

ततोऽस्माभिः सानुनयमभ्यर्थितेषु तेष्वन्यतमः प्रवया वक्तुमारेभे।

अश्वत्थो वदति,—भो भो नानादिग्देशसमागताः सुभद्रा वनस्पतयः, परमप्रियतमा लताबन्धवश्च, सावहिताः शृण्वन्तु भवन्तः; अद्य मानववार्त्तैवास्मत्समालोच्यविषयः। अत्र खल्वस्माभिर्बहुवक्तव्यमस्ति, भवद्भिश्च बहुश्रोतव्यं, मन्तव्यं, ज्ञातव्यं, शिक्षितव्यं, निदिध्यासितव्यञ्चास्ति, तदत्र श्रीमद्भिः श्रीमतीभिश्च दत्तावधानैर्भवितव्यमिति।

मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतमा सृष्टिः। समन्तादभिनवोत्तरोत्तरविलक्षणसृष्टिमुत्पादयता भगवता जग-

त्सवित्रा यादृक् बुद्धिप्रकर्षः, सृष्टिनैपुण्यञ्च प्रदर्शितम्, मानवसर्गं विदधता पुनरनेन तत्सर्वमेकपद एवापहारितम्, एतावदुच्चावचसृष्टिपरम्परामवलोक्य स्रष्टुरगाधबुद्धिमत्त्वं 'सृष्टिश्चेयं बुद्धिपूर्विकेति' यदस्माभिरनुमितमासीत् पूर्व्वम्, साम्प्रतं मानवसर्गसन्दर्शनेन तु निःशेषतोऽपागतोऽसौ संस्कारः, सञ्जातश्च तद्विपरीतः 'स्रष्टुर्न स्वल्पापि बुद्धिर्विद्यत' इत्येवंरूपः कोऽपि निश्चयः। तथाहि मनुष्यास्तावत् स्वसृष्टित आरभ्यैव सर्वविधया चेष्टयात्मनां सम्यक् स्रष्टृप्रतिद्वन्द्विता प्रख्यापयितुमारब्धवन्तः, प्रवृत्ताश्च सर्वविधेषु व्यापारेषु स्वेषां परमेश्वरस्य समकक्षतां प्रख्यापयितुम् । किञ्च साक्षात् प्रकारान्तरेण वा परमेशसत्त्वोच्छेद एव तेषां चरमलक्ष्यः। तथाहि दृश्यते तेषु प्रधानतस्तावन्नास्तिकास्तिकेतिसम्प्रदायद्वयम् । तत्र नास्तिका नाम "ईश्वरासिद्धे" रिति तारस्वरेणोद्घोषयन्तः सर्वथा युक्तिप्रमाणाभ्यां जगत्कर्त्तुः परमेश्वरस्यास्तित्वं विलोप्य बाह्वास्फोटपुरःसरं जगदिदं निरीश्वरं प्रतिपादयन्ति । मनुष्येषु येषां बुद्धेः प्राखर्य्यं, तीक्ष्णता चास्ति, विद्यावत्तायाश्चाधिक्यं वर्तते, ते सर्व एव मतमिदमाद्रियन्ते सम्यगनुसरन्ति च, विशेषतस्त्वैश्वर्य्यमदमत्तानां धनवतां किल मतेऽस्मिन् महत्यास्था दृश्यते । तेह्यात्मानमप्रतिहतैश्वर्य्यसम्पन्नं मत्वा न बिभ्यति किञ्चिदपि यथेच्छाचरणात् । प्रबलकलिकालविलसितमेतदिति तु श्रीमद्भिर्नावगन्तव्यम्, सम्पूर्णचतुष्पाद्धर्म्मसम्पन्ने सत्ययुग एव मतमिदं सनकसनन्दाभ्यामुद्भावितम्, ततश्च सनातनकपिलाभ्यां महर्षिभ्यामुद्घोषितं जगति, अथ क्रमेणासुरिपञ्चशिखाचार्य्याभ्यां सर्वतः प्रचारितमभूत्, दृश्यते चैतन्मतप्रवर्त्तकानामुपरि सर्वेषामेव भारतवासिमानवानां कोऽप्यान्तरीणः श्रद्धातिशयो यतस्ते प्रत्यहं स्वपितृतर्पणादपि प्राक् तान् तर्पयन्ति। तर्पणमन्त्रस्तु—

"सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।
सर्वे ते तृप्तिमायान्तु मद्दत्तेनामुना सदेति ।"

अथवा न केवलं भारतभुवां मानवानां, मतेऽस्मिन् निखिल-भूमितलसम्भूतमर्त्यानामेव सम्यक् समादरो दरीदृश्यते। किंवा, दूरेऽस्तु तावन्मनुष्याणां कथा, सकलसुरलोकाचार्य्यपदमधि-कुर्वतो भगवतो वाचस्पतेरपि मतेऽस्मिन् सुमहान् पक्षपातः सञ्जातस्तेनासौ मतस्यास्य "चार्वाकदर्शन"रूपेण परिणतिं विधाय भुवनेषु प्रचारितवान् । बुद्धदर्शनमप्येतन्मूलकमिति निःसंशयं कथयितुं शक्यते । स्पेन्सर-मिल-प्रमुखाः पाश्चात्यदेशोज्ज्वल-मणिमयशेखरसरूपाः खलु विद्वांसो मतमेतदेवोपजीव्य विविधान् सारगर्भान् निबन्धान् विरचितवन्तो यानधीत्य मानवा अचिरे-णैव सङ्घशस्तेषां शिष्यत्वमापन्ना इति श्रूयते । वस्तुतः परमेश्वर-सत्ताङ्गीकारो नाम समुन्नतपदारूढ़ानां मानवानां विद्याबुद्धि-विवेकशक्तीनामत्यल्पत्वव्यञ्जकतया समाजाग्रतः शिरोवनमन-कृल्लज्जाकरो भवति । तेषान्नये परमेश्वरसत्ताङ्गीकारस्तदुपा-सनार्थकधर्म्माचरणानि च विद्यापौरुषहीनानां जीविकानिर्वाह-कान्येव । "नास्तीश्वरो नास्ति परलोकः" । ततश्च— "यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिवेत् ।" इत्येव तेषां चरमः सिद्धान्तः । ईश्वरप्रेम परित्यज्य मनुजेष्व कपटप्रेम विधातुमेव तेषां सर्वात्मना प्रवृत्तिः, परमेशोपासनास्थाने मानवसमाजोपसनैव तेषां शास्त्रविहितं पवित्रव्रतम् । ततश्चाहिंसास्तेयसत्याद्यनुसरणं तेषां सहजाचारो येन ते नास्तिकआपि बह्वास्तिकेभ्यः सन्मानमर्हन्ति, समाकर्षयन्ति च सामाजिकानां हृदयम् ।

अथ ये आस्तिकास्ते वाक्यतः परमेश्वरस्य सत्त्वाङ्गीकारेण तद्विरुद्धवादिनो नास्तिकान् भृशं विगर्हयन्तोऽपि वस्तुगत्या भङ्ग्यन्तरेण नास्तिकमतमेव परिपोषयन्ति । पर्य्यालोचनया तेषामास्तिक्यवादिनां मतं बुद्धिमद्भिर्नास्तिक्यवादतो निःसारतया प्रतीयते । तेषां खलु वचनानि बहिरीश्वरसत्ताप्रतिपादकान्यपि मत्स्यादिनिकृष्टजीवविशेषवामनादिमानवविशेषाणामीश्वरावतारत्वतदभेदप्रख्यापकतया हि वस्तुतः परमेश्वरस्यानन्यसाधारणालौकिकैश्वर्य्यापहारकाण्येव । आस्तिकानान्तावत् प्रधानतो द्वौ भेदौ वर्तेते । एके द्वैतवादिनोऽन्येऽद्वैतवादिन इति । तत्र द्वैतवादिनां मते परमेश्वरवत् सन्त्यन्यान्यपि कानिचिज्जगन्निर्म्माणकारणभूतानि नित्यवस्तूनि ततश्च तैः परमेशस्याद्वितीयत्वादिविशेषधर्म्माणां लोपः कृतः । अद्वैतवादिनस्तु "एकमेवाऽद्वितीय"मिति श्रुतिवचनमाश्रित्य परब्रह्मणोऽन्यस्य कस्यचिदपि परमार्थसतो वस्तुनः सत्तां नाङ्गीकुर्वन्ति। अद्वैतवादिनामपि शुद्धाद्वैतवादिप्रमुखावान्तरभेदो वर्त्तते । तेषामप्रासङ्गिकत्वादलमत्र तदप्रस्तुतचिन्तया । द्वैताद्वैतवादिन उभये च यथा परमेश्वरस्य सत्त्वमङ्गीकुर्वाणा अपि तस्यैश्वर्य्यं विलोपयितुं प्रवृत्तास्तदेवाद्य भवतां प्रदर्श्यते । तत्र द्वैतवादिनो नैयायिकप्रमुखाः केचनानुमानेन जगत्कार्य्यं प्रति कर्तृतया परमेश्वरस्य सत्तां निश्चित्य तस्य च नित्यज्ञानेच्छादिमत्त्वं स्वीकुर्वाणा अप्यदृष्टदोषतस्तदैश्वर्य्यापघातकाः सञ्जाताः । तेषां नये अस्ति खलु कश्चिदीश्वरः, स च नित्यज्ञानेच्छादिधर्म्मवानपि जगत्कार्य्यवैचित्र्यं प्रति तस्य सर्वमैश्वर्य्यं सदप्यसदिव न किञ्चिदुपयोगि भवति। जगत्यस्मिन्यावन्ति विचित्राणि कार्य्याणि दृश्यन्ते तानि सर्वाणि प्राक्तनकर्मसञ्चिताऽदृष्टप्रभवान्येव । न ह्यदृष्टस्य सहायकमन्तरेण परमेश्वरेण स्वेच्छया तृणांकुरमपि

समुत्पादयितुं शक्यते, नोत्पादयति वासौ ब्रह्माण्डेऽस्मिन् क्षुद्रात् क्षुद्रतरमपि वस्तु विना अदृष्टसाहाय्यम्। यदि नाम स्थावरास्थावरात्मकं यावत्कार्य्यं प्रत्यदृष्टस्यैव साक्षात् कारणत्वं स्वीक्रियते, यद्यदृष्टवशादेव सुखं, दुःखं, जन्म, जरा, मरणञ्च प्राणिषु संघटते, यद्यदृष्टवशादेव बीजादंकुरस्यांकुरात्तरुलतादिनानाविधौषधीनां, तेषु च पुष्पाणां, पुष्पेभ्यश्च फलानान्तेभ्यः पुनर्बीजानामुत्पत्तिर्भवति, किम्बहुना यदिनामादृष्टमन्तरेण विश्वेऽस्मिन् किमप्यभिनवं वस्तूत्पादयितुं, समुत्पन्नस्य स्तोकमपि वाऽन्यथाकर्त्तुं परमेश्वरस्य किमपि सामर्थ्यं न विद्यत इति, तदा का नामापेक्षा तथाविधस्य स्वतोऽनीश्वरस्य परमेश्वरस्य सत्तायाम्? तस्य सत्ताऽप्यसत्तया तुल्यैव। ततश्च सत्यमभिहितम्—

"नमस्तत्-कर्मभ्यो विधिरपि न येभ्यः प्रभवति।"

* तेषां नये प्राक्तनशुभाशुभकर्मजनिताऽदृष्टप्रभावादेव जगति नानारूपाणि शुभान्यशुभानि च घटन्ते, अदृष्टप्रभावादेव कण्टकानां तीक्ष्णाग्रता, पर्वतानामुत्तुङ्गशिलोच्चयरूपता, समुद्राणामगाधजलराशिता, ऋतूनां पर्य्यायेणानुवृत्तिस्तत्तत्फलकुसुमादियोनित्वञ्च, अदृष्टप्रभावादेव चन्द्रमसि स्वाभाविकं शैत्यं, भास्वति सन्तापः, ग्रहतारकाणां राशिचक्रपरिभ्रमणं जायते। किंवा बहुनोक्तेन जगत्यस्मिन् यावन्तोऽर्थाः स्थावरजङ्गमात्मका द्रव्यगुणकर्मजातिरूपा वा सम्भवन्ति, सम्पाद्यन्ते, दृश्यन्ते श्रूयन्तेऽनुभूयन्ते, प्रलीयन्ते च, तेषां सर्वेषां सत्तामसत्तां प्रत्यदृष्टस्यैव साक्षात् कारणत्वमीश्वरस्तु साक्षिगोपाल इव सर्वत्र साक्षिरूपेण तिष्ठति। ततश्चास्याप्रतिहतैश्वर्य्यसत्तादिगुणग्रामस्याजागलस्तनस्येव निरर्थकत्वमायातम्। तस्य रोषेण तोषेण वा

संसारेऽस्मिन् न कापि हानिर्लाभो वा सञ्जायते, इदानीं विचार्य्यतान्तावत्तथाविधेश्वरसत्तामङ्गीकुर्वद्भ्यो नास्तिकानां को नाम विशेष इति।

अदृष्टस्यैवमप्रतिहतमैश्वर्य्यमवलोक्य मीमांसकास्तावन् मन्त्रशक्तितः पृथग्भूतां ईश्वरसत्तां नाङ्गीचक्रुः। ततश्चेश्वरः खलु वाङ्मात्रत्वे पर्य्यवसितः। कथयध्वमिदानीं किन्नामास्मादप्यधिकं नास्तिक्यं भवितुमर्हतीति। यैः किल सर्वशक्तिमतः सर्वज्ञस्य परमेशितुर्नामशेषता प्रतिपादिता तेऽपि किन्नास्तिकपदवीमधिकर्त्तुमर्हेयुः ? (समन्तात् करतालिकादानानन्तरं सोच्चैर्हासम्) "नहि, नहि, नहि, कदापि नही"ति सभ्यानां युगपदुच्चारितप्रतिवचनकलकलः प्रादुरभूत्। अश्वत्थश्च कञ्चित् कालं तूष्णीं स्थित्वा पुनरपि वक्तुमुपचक्रमे। पादपत्वाद् व्याख्यानावसरेऽन्तरान्तरा तस्य जलपानव्यापारस्तु नास्माभिः प्रत्यक्षीकृतः, न वा शुभ्रवस्त्रखण्डेन मुखमार्जनव्यापारः, किन्तु व्याख्यानावसाने कस्यचिदतिसन्निहितसम्पूर्णस्य सरसः सद्योऽर्द्धजलशोषणसन्दर्शनादत्रावसरे तेनासकृत् प्रकामं जलमापीतमिति निर्बाधमनुमितमस्माभिस्तदानीम्। अश्वत्थो वदति—अथ ये नामाद्वैतवादिनः, (अहमत्राद्वैतवादिनामवान्तरभेदान् नीरसतया परिहाय सामान्यतो ब्रवीमि) ये नामाद्वैतवादिनस्तेऽपि परमार्थतो नास्तिका एव। तेषामीश्वरस्तु कश्चिद्विलक्षण एव जगत्कर्त्तापि स्वयं न किमपि करोति, सर्वनियन्तापि सम्यगुदासीनस्तिष्ठति, स "सर्वतः पाणिपादोऽपि" न किञ्चिद् गृह्णाति, न च पादमेकमपि गच्छति, "सर्वतोऽक्षिशिरोमुखोऽपि" न किञ्चित्पश्यति, न किञ्चिद्वदति, न कस्यापि करुणार्त्तप्रलापमाकर्णयति, न कस्मिँश्चिद्दयते, न कञ्चिदुद्धरति, त्रायते वा, न कस्मिन्नपि स्निह्यति, नवा कस्योपरि प्रीयते,

न स्तुत्या सन्तुष्यति, न निन्दया क्रुध्यति, न पूजां गृह्णाति न नतिमाद्रियते, न गुणिनं पुरस्करोति, न निर्गुणं परिजहाति, किं बहुना स परिणामरहितोऽपि प्रकृतिमापन्नः, सर्वज्ञोऽपि विमूढस्वभावः, नित्यमुक्तस्वरूपोऽपि मायापाशबद्धः, स्वतन्त्रोऽपि प्रकृतिव्यापाराधीनः, स्रष्टापि सृष्टवस्तुष्वन्तर्भवति, कर्तापि कार्य्यभावं भजते, अविनश्वरोऽपि न क्षयमतिक्रामति । एवमद्भुतमीश्वरमालोक्यालङ्कारिकैः खलु विरोधाभासस्याविर्भावः कृतः । एवंविधेश्वरस्वरूपावगतये तन्मतस्य कापि विवृतिरपेक्ष्यते । ततश्चात्र यथावश्यकमद्वैतवादिनां मतं विवृणोमि ।

अद्वैतवादिनः खलु "एकमेवाद्वितीयम्" इत्यादि—श्रुतिवचनजातमवलम्ब्य "एकमेव परब्रह्म विहाय नान्यत् किमपि सद्वस्तु विद्यत" इति वदन्ति, तेषां प्रमाणन्तु—

"इदं सर्वं पुरा सृष्टेरेकमेवाद्वितीयकम् ।
सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः ॥"

अन्यत्सर्वं जगदसत्, मिथ्याभूतं मायाविजृम्भितमात्रम् । तद्धि ब्रह्म वस्तु, स्वप्रकाशं चैतन्यस्वरूपं जगदिदं समन्ताद्व्याप्य स्थितम्, अखण्डमपि मायावशेनांशतोविकृतमंशतश्चाविकृतं, विशुद्धस्वरूपावस्थितम् । तस्य विकृतांश एव विचित्रानन्तजगद्रूपेण परिणतोऽविकृतांशस्तु विशुद्धचैतन्यरूपः । चैतन्यस्वरूपस्यांशस्यापि न ज्ञानवत्तादिधर्मा विद्यन्ते । तस्याकृतिः प्रकृतिरपि न स्तः । तत इदं चिद्रूपमपि स्वयमज्ञं सदसज्ज्ञानरहितं ततश्चोपलखण्डवज्जड़भूतमेव, स्वप्रकाशमपि निर्गुणं निराकारञ्च, तथा सदप्यसता तुल्यमेव, यतोऽस्य सत्तया न किमपि प्रयोजनं सिध्यति, वस्तुतस्तथाविधस्य ब्रह्मणः सत्त्वे-

ऽप्यसत्त्वे वा नास्माकं कापि वृद्धिः, क्षतिर्वा शङ्कनीया। अथ मायाकृतविकृतस्यानन्ताद्भुतजगद्रूपेण विजृम्भितस्य ब्रह्मांशस्य विचारः क्रियते। परं तद्विचारात् प्राक् माया विचार्य्यते। अद्वैतवादिनां मते सा हि—

"निस्तत्त्वा कार्य्यगम्यास्य शक्तिर्मायाग्निशक्तिवत्
नहि शक्तिः क्वचित्कैश्चित् बुद्ध्यते कार्यतः पुरा॥"

अस्यार्थः—'निस्तत्त्वा' जगत्कारणभूतात् सद्वस्तुनः पृथक्-सत्त्वरहिता, 'कार्य्यगम्या' वियदादिकार्य्यलिङ्गगम्या, 'अस्य' सद्वस्तुनः, 'शक्ति'र्वियदादिकार्य्यजननसामर्थ्यं मायेत्युच्यते, वस्तुस्वरूपातिरिक्तशक्तिसद्भावे दृष्टान्तमाह—'अग्निशक्तिवत्'-अग्नेर्दाहजननीशक्तिरिव। अथैवंविधा शक्तिः कथं न ब्रह्मणि सृष्टेः प्रागुपलक्षितेत्याशङ्क्याह—'क्वचित्' कुत्रापि शक्तिमति 'कार्य्यतः पुरा' कार्य्योत्पत्तेः प्राक् शक्ति'र्न हि बुध्यते' न ज्ञायते, न हि दाहात् पूर्वमग्नौ दाहकारिणी शक्तिरस्तीति केनापि अवगम्यते। अन्यथा बालमूर्खादीनामज्ञानां हस्तेनाग्निग्रहणे प्रवृत्तिर्न स्यात्।

परमिदमत्र वैचित्र्यम्, अग्न्यादेर्दाहकादिशक्तयो हि यावद्-वस्तुव्यापिन्यो भवन्ति, मायारूपा ब्रह्मणः शक्तिर्हि न तथा, तथाह्युक्तम्—

"न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किन्त्वेकदेशभाक्।
घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्त्तते॥ इति॥"

यथा घटोत्पादिका शक्तिर्न यावद्भूमिवृत्तिः, किन्तु जलक्लिन्नायां मृदि, तथेयं मायाशक्तिर्न सर्व्वस्मिन् ब्रह्मणि किन्तु तदेकदेशव्यापिनीत्यवगन्तव्यमत्र प्रमाणमप्युपदर्शितम्:—

"पादोऽस्य विश्वा भूतानि त्रिपादस्ति स्वयंप्रभः।" इत्यादिश्रुतयः। तथा—"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।" इत्यादिस्मृतयोऽपि। यथा भित्तिगता वर्णा रक्तपीतादयो भित्तौ नानाविधं चित्रं कल्पयन्ति, तथा ब्रह्मैकदेशमाश्रिता सा शक्तिर्मायारूपा ब्रह्मणि बहुविधा विक्रियाः कल्पयति। ततश्च मध्याह्नार्कमरीचिकासु पयःपूरस्येव, रज्जौ सर्पस्येव, मायाविकृते ब्रह्मैकदेशे आकाशादिविचित्रजगतो विभ्रम उपजायते।

उपन्यासोऽयं सुकल्पितोऽपि स्वभावतो जडधियामस्माकं न तावत् सम्यग्रुचिकरो भवति, न वास्माकं जडस्वाभाविकी बुद्धिस्तात्पर्य्यमस्य सम्यगवगन्तुं शक्नोति, प्रथमं तावत् कथं सा मायाशक्तिर्ब्रह्मण एकदेशमात्रं नतु सम्पूर्णं ब्रह्म व्याप्य स्थितेति न प्रबुद्धमस्माभिः। दृष्टान्तीकृतात्वग्नेर्दाहात्मिका शक्तिर्हि सम्पूर्णमेवाग्निं व्याप्य तिष्ठति, न ह्यग्निरंशेन तापं चांशेन च शैत्यमुत्पादयति, इत्थं जलस्य शैत्यशक्तिरपि सर्व्वमेव जलं व्याप्य तिष्ठति, नहि जलमंशतः शीतलत्वमंशतश्च दाहमुपजनयति, इत्थं वस्तूनां स्वाभाविका हि शक्तयो यावद्वस्तुव्यापिन्यो भवन्ति नतु तत्तद्वस्त्वंशव्यापिन्यो, नहि सूर्य्योंशतश्चालोकमंशतश्चान्धकारमातनोति। (सर्व्वे स्वशाखाघर्षणं कृत्वा आनन्दं सूचयन्ति)

* किञ्च "घटोत्पादिनी शक्तिर्नामार्द्रायामेव मृदि, न तु कृत्स्नायान्तथैव न सर्वस्मिन्ब्रह्मणि मायाशक्तिः किन्त्वंशत एवेति" यदुक्तन्तदप्यस्माभिर्न सम्यगवगतम्। मृत्तिकाया आर्द्रता नाम न स्वाभाविकी, किन्तु रसोपाधिजन्यविकारविशेषरूपैव। निसर्गतो निर्विकारस्य कूटस्थस्य ब्रह्मणोंऽशतस्तादृशविकारं प्रति न कोपि हेतुरुपदर्शितस्तस्यांशतो विकृतिं प्रति मायाया

* २७ खण्ड ७ संख्या, XXVII No. 7.

एव हेतुत्वमुक्तं, किन्तु मायाया आंशिकत्वे न किमपि कारणतयो-पन्यस्तम् । अन्यच्च स्वाभाविकी नाम वस्तुशक्तिरग्नेर्दाहिका शक्तिरिव, जलस्य शैत्योत्पादिका शक्तिरिव, यावद्वस्तुव्यापिन्येव भवति। कथमत्र तन्नियमस्य विपर्य्यय इति तु विशेषहेतु-प्रदर्शन मन्तरेण नास्माकं सम्यग् बुद्धिविषयो भवति । या न सर्व्वांशव्यापिनी शक्तिः सौपाधिक्येव, यथा मृदो घटोत्पादिनी शक्तिः, सा खलु रसोपाधिकार्द्रतानिबन्धनैवेति दृष्टान्तदार्ष्टा-न्तिकयोर्नैकरूपत्वं सङ्गच्छते, एतेनांशत उत्तुङ्गकल्लोलशालिनांश-तश्च प्रशान्तसुस्थिरगम्भीरेण महासागरेण तथाविधस्यांशतो विकृतिं प्राप्तस्य ब्रह्मणोऽपि दृष्टान्तो निरस्तः, यतो महासागरस्य तथाविधविरुद्धधर्म्मवत्ता तु न स्वभावजन्या, प्रबलवात्यारूपो-पाधिहेतुकैव।

अन्यच्च स्वाभाविकी हि शक्तिर्न केवलं यावद्वस्तुव्यापिनी, प्रत्युत यावद्वस्तुभाविन्यपि भवति, ततश्च मायारूपाया अपि शक्तेस्तथात्वे, ततो ब्रह्मणो विमुक्तिलाभः सर्व्वथा सुदूरपराहत एव। उक्तञ्च श्रीभगवता स्वयमेव "मम माया दुरत्ययेति" ततश्च तेषांमुख्यपुरुषार्थभूतविमुक्तिलाभवार्त्ता खलु गगनकुसुमसौरभा-घ्राणकल्पनावत् निर्भित्तिकैव भवेदित्यपि सुधीभिर्विभाव्यम् ।

अथेदानीं मायाकृतविकारस्य ब्रह्मांशस्य जगद्रूपेण परिण-तिर्विव्रियते ।

"सत्तत्त्वमाश्रिता शक्तिः कल्पयेत् सति विक्रियाः ।
वर्णा भित्तिगता भित्तौ चित्रं नानाविधं यथा ॥"

यथा भित्तिगता वर्णा रक्तपीतादयो धातुविशेषा भित्तौ नाना-विधं चित्रं कल्पयन्ति, तथा ब्रह्मस्वरूपं सत्त्वमाश्रिता शक्तिः सति ब्रह्मण्येव "विक्रियाः" विविधत्वेन क्रियन्ते-इति विक्रियाः,—

कार्य्यविशेषान् कल्पयति। अथ कीदृशान् कार्यविशेषान् जनयतीत्याह—

"तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा।
सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते॥"

सा हि जगत्कारिणी शक्तिः सत्त्वरजस्तमोगुणानां साम्यावस्थारूपा प्रकृतिरित्युच्यते। सा च द्विप्रकारा भवति, तथाहि:— सत्त्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिर्गुणान्तरेणाकलुषीकृतता, अविशुद्धिर्गुणान्तरेण कलुषीकृतता, ताभ्यां सत्त्वशुद्धि-अशुद्धिभ्यां द्विविधा, "माया," "अविद्या" चेति। ततः, विशुद्धसत्त्वप्रधाना माया, मलिनसत्त्वप्रधाना अविद्या। अनयोर्मायायां प्रतिफलितश्चिच्छक्तिः (परब्रह्मांशविशेषः) तां मायां स्वाधीनीकृत्य वर्त्तमानः "सर्वज्ञ" "ईश्वर" इति कथ्यते। तथा अविद्यायां प्रतिफलितस्तत्परतन्त्रश्च (तस्या अविद्यायाः परतन्त्रः अधीनश्च) चिदात्मा (परब्रह्मांशविशेषः) अन्यः "जीवः" इति कथ्यते, स तु तस्या उपाधिभूताया अविद्याया वैचित्र्यादविशुद्धितारतम्यादनेकधा—अनेकप्रकारः, देवतिर्यगादिभेदेन बहुविधो भवतीत्यर्थः। तस्य परब्रह्मणो यावन्तमंशं परिव्याप्य विशुद्धसत्त्वप्रधाना मायाशक्तिरवतिष्ठते, स नामांशः "सर्वज्ञ ईश्वरः" इत्यभिधीयते, विशुद्धसत्त्वस्यैकरूपत्वात् सोऽप्येकरूप एव भवति, माया च तस्य वशीभूता तिष्ठति। अथ तस्य यावन्तमंशं परिव्याप्य मलिनसत्त्वप्रधानाऽविद्याशक्तिरवतिष्ठते स नामांशो "जीव" इत्युच्यते, स च सर्वथा अविद्यापरतन्त्रो मलिनसत्त्वोभवति, तथा तस्मिन्नविद्यायास्तारतम्यान्मलिनताया अपि तारतम्यं जायते। किञ्च अविद्याया बहुविधत्वं स्वत एव सम्पन्नम्। अविद्याप्रकारभेदाच्च तदधिष्ठितस्य जीव-

स्यापि प्रकारभेदोऽवश्यमङ्गीकार्य्यः। अतएव जगति तिर्यङ्-मनुष्यदेवप्रभृतीनां नानाविधानां जीवानामाविर्भावो जात इत्यद्वैतवादिनो वदन्ति । सा चाविद्या स्थूलसूक्ष्मशरीरादि-कारणीभूतप्रकृत्यवस्थाविशेषतयोपचारात् "कारणशरीरमिति" चाख्यायते, तत्राभिमानवान्—तेन कारणशरीरेण सहात्मानम-मभिन्नम्मन्यमानो जीवः पूर्वोक्तरूपब्रह्मांशविशेषः "प्राज्ञ" इति कथ्यते ।

अथ स्वभावतो जड़धियां युष्माकं स्मृतिदार्ढ्याय पूर्वप्रबन्ध एव संक्षिप्योच्यते—परब्रह्मणोंऽशविशेषं परिव्याप्य या जगत्का-रिणी शक्तिरस्ति सा सत्त्वरजस्तमोगुणानां साम्यावस्थारूपा प्रकृतिरिति कथ्यते । सा पुनर्विशुद्धसत्त्वप्रधाना माया, मलिन-सत्त्वप्रधाना अविद्येति, प्रथमतस्तावद्द्विविधा । तत्र माया-धिष्ठितश्चिदंशः सर्वज्ञ ईश्वर इति, अविद्याधिष्ठितश्चिदंशो जीव इति चाख्यायते । अविद्या च कारणशरीरं नाम, तया सहा-त्मानमभिन्नंमन्यमानो जीवः प्राज्ञ इत्यभिहितः । इति ।

अथ प्रकृतिसृष्टिक्रमस्तदनुमतः कथ्यते, प्रकृतेस्तमोमयांशात् क्रमेण :—

"वियत्पवनतेजोऽम्बुभुवो भूतानि जज्ञिरे ।
सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम् ॥
श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते ।
तैरन्तःकरणं सर्व्वैर्वृत्तिभेदेन तद्द्विधा ॥
मनो विमर्शरूपं स्याद् बुद्धिः स्यान्निश्चयात्मिका ।
रजोंऽशैः पञ्चभिस्तेषां क्रमात् कर्मेन्द्रियाणि तु ॥
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे ।
तैः सर्वैः सहितैः प्राणो वृत्तिभेदात्स पञ्चधा ॥
प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः ।
"बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया ।
शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते ॥"

अश्वत्थः—(सर्वतः सदृष्टिक्षेपं) भो भो वनस्पतिकुल-प्रदीपा महापादपाः! कुसुमकोमलदन्तरुचो लताकुलललनाश्च, मानवस्वभावमभिवदता मया प्रसङ्गेनेश्वरतत्त्वमवतार्य्य, महीलतामुत्खनता कृष्णसर्पोद्घाटनमिव, सुमहाननर्थपातः कृतः। वर्णनीयविषयस्यातिनीरसतया न केवलं श्रीमतामत्रभवतां भवतां, श्रीमतीनां स्वभावकोमलचेतसां लतावधूनाञ्च सुमहच्चित्तचाञ्चल्यमुत्पादितं यावद्विषयस्यास्य निसर्गागाधतामसीमतां स्वकीयवाक्शक्तेरल्पताञ्चावलोक्य ममापि मतिरतीवाकुला सञ्जाता। विषयमिमं वक्तुमुपक्रम्य यथा यथाग्रे सरामि, तथा तथैव महाम्बुराशेरिव किमपि सुदुस्तरत्वमपारत्वं, महामहीधरस्येवातितुङ्गत्वं दुर्लङ्घ्यत्वं, महाव्योमतलस्येवासीमता चास्याग्रतः परिस्फुरति। न तत्त्वतो विज्ञायते, कियदभिहितं कियद्वाभिधातव्यं, कुत उपक्रमः कृतः, कुत्र वोपसंहारो भविष्यतीति, कथितमकथितं सर्वं तुल्यरूपं विभाति, वर्णितं, वर्णनीयञ्च साम्यमावहति, पूर्वमुत्तरञ्चैकरूपं विवरीवर्त्ति, पुरः पश्चाच्च न वैशिष्ट्यमवगमयति। वक्ष्यमाणस्योक्तस्य च न विभेदोऽनुभूयते, उक्तं ह्यनुक्तमिव प्रतीयते, किं बहुना, तत्त्वमिदं, यथा यथा प्रस्फुटं प्रकटयितुं प्रयत्नं करोमि, तथा तथैव घोरे तमसि निमग्नमिवात्मानं विजानामि। स्वयं न किञ्चिदनुभवामि, किं युष्मान् बोधयामि? यत्सत्यं, महतीमाकुलतामनुभवामि। ततो विषयमिमं परिहृत्य विषयान्तरानुसरणमेव श्रेयस्तया विभावयामि, परं यदर्थमेतस्य महतोऽर्थस्य प्रस्तावना कृता, तदनभिधाने समुन्मत्तस्य प्रलपनमिव मम वागाडम्बरोऽयं सर्वथैव हास्यास्पदं भविष्यतीति तन्मात्रमभिधीयते।

अस्माभिरिह मनुष्यजातिमधिकृत्य यद्यदुच्यते तद्धि सर्वं प्रधानतो भारतीयमनुष्यपरमित्यवगन्तव्यं, यतो भारतीयमानवैरेवास्माकं कोऽपि सुचिरसम्बन्धो वर्वर्त्ति । किञ्चास्माभिर्यत्किञ्चिज्ज्ञानमुपार्जितं, तद्भारतीयदर्शनशास्त्रमूलकमेव । अस्मद्विद्याभ्याससमये देशान्तरशास्त्राणां वार्त्तापि न श्रुता, न जाने तदानीं तेषु तेषु देशविशेषेषु का कथा शास्त्रविशेषस्य, वर्णशिक्षाया अपि सत्ता सञ्जाता न वेति । (सर्व्वेषामुच्चहास्यम्) अथवा वर्णमालासत्ता तावद्दूरेऽस्तु तदानीं भारतभूमेर्बहिर्यदि नाम कुत्रचित् प्रदेशे मनुष्यसत्ताऽप्यभवत्, ते पुनर्मानवा आहारनिद्राभयमैथुनपराः स्वस्वप्रतिवेशिपशुभिः समाना एवासन्, इदानीं ये नाम नव्याः सभ्या भव्या देवप्रभावा मानवाः कदाचित् मृगयाव्यपदेशेन वनान्तप्रदेशमलंकुर्वाणाः श्रीमतां भवतां दृग्गोचरीभूय, चक्षुषां सार्थक्यं महीरुहजन्मनश्च साफल्यमुत्पादयन्ति श्रीमतां, तेषां प्राक्तनाः पुरुषा नराकाराः पशवो, गतिशीला उद्भिज्जा वा आसन् । (मुहुः करतालिकादानपूर्व्वकं सर्व्वेषामुच्चहास्यम्) अलमेतेनाप्रस्तुतप्रसङ्गिना वागाडम्बरेण । भारतीयशास्त्राणि तावदरण्यभूमौ प्रादुर्भूतानि तेषामध्ययनाध्यापनालोचनविचारकर्माणि अरण्यभूमौ सम्पादितानि, शास्त्रकृतश्च सर्व्वे महारण्यवासिनोऽगाधज्ञानसम्पन्नाः सर्व्वज्ञा महर्षयो निरावरणारण्यभूमौ यथेच्छं जडाजडसाधारणेषु स्वस्वशास्त्रप्रचारव्यतिकरमकार्षुः ।

तेहि शिष्येभ्यो न किमपि वेतनं जगृहुः, प्रत्युत भोजनाच्छादनप्रदानपूर्व्वकं सहस्रशः शिष्यानध्यापयामासुः । तादृशप्रकारेण षष्टिसहस्रशिष्याध्यापकानां "कुलपति" संज्ञा कृता, सर्व्व एव ते महर्षयः कुलपतयो बभूवुः । ततश्च निरन्तरनिर्बाधतत्तत्कुलपतिशिष्याध्ययनश्रवणतोऽस्माकमपि भारतीयशास्त्रेषु कापि